नं० ८८२-घ

जैमिनिसूत्राणि सव्याख्यानि (ज्योतिषम्)

सुबोधिनी व्याख्या

पत्राणि ४६ (अपूर्णम्)

कर्त्ता नीलकंठः (ज्योतिषम्)

संवत १८८५

नं० ८६ [illegible]
जैमिनिसूत्र [illegible] द्वितीय
[illegible] पत्राणि
[illegible]
१-२६ ३० [illegible]
ज्योतिषम् - अपूर्ण
कर्ता - नीलकण्ठः
लि० सं० १८५१ [illegible]

(अपूर्ण) जैमिनीयसूत्रद्वितीयाध्यायप· २४ सटीक

(ज्योतिषम्)

जन्मलग्नेश=२

१

॥श्रीगणेशायनमः॥ अथायुर्दायोपायं दर्शयति आयुः पितृदिनेशाभ्यां लग्नेशाष्टमेशाभ्यामायुर्विचार्यमित्यर्थः लग्नेशाष्टमेशास्थितिवशतो दीर्घायुर्योगमाह प्रथमयोरुत्तरयोर्वा दीर्घं प्रथमयोश्चरयोरुत्तरयोः स्थिरद्विःस्वभावयोर्वा यदि लग्नेशाष्टमेशौ भवतस्तर्हि दीर्घायुर्भवति अयमर्थः यत्र क्वापि चरराशौ लग्नेशाष्टमेशयोः स्थितत्वाद्दीर्घायुर्योगः स्थिरद्विस्वभावयोर्लग्नेशाष्टमेशयोः स्थितत्वाद्दीर्घायुर्योगः स्थिरलग्नेशे सति द्वंद्वे ऽष्टमेशः द्वंद्वे लग्नेशे सति स्थिरे ऽष्टमेश इति पर्यायेण भवतस्त[illegible]दापि दीर्घायुर्योगः स्यादिति अत्रैकस्मिन्नेव चरा दौ तदुभयसत्वे एकस्यैव तदुभयस्वामित्वे वा न योग हानिः॥ ॥अथ मध्यायुर्योगं दर्शयति प्रथमद्वितीययोरंत्ययोर्वा मध्यं प्रथमद्वितीययोश्चरस्थिरयोः

१ दीर्घ १	१ म २	१ अ ३
२ दीर्घ ३	२ म २	२ अ २
३ दीर्घ २	३ म २	२ अ २

चरे लग्नेशः स्थिरेऽष्टमेशः चरेऽष्टमेशः स्थिरे लग्नेशः इति रीत्या यदि भ
वति यदि वा द्विस्वभावयोर्द्वयोरपि लग्नेशाष्टमेशौ यत्र क्वापि भवतस्तर्हि म
ध्यायुर्भवतीत्यर्थः। ।अथाल्पायुर्योगमाह मध्ययोराद्यंतयोर्वा हीनं
यदि मध्ययोः स्थिरयोः यत्र क्वापि लग्नेशाष्टमेशौ स्तः यदि वा आद्यंतयोश्च
रद्विस्वभावयोर्लग्नेशाष्टमेशौ तर्हि हीनमल्पायुर्भवतीत्यर्थः अथ यथा
लग्नेशाष्टमेशयोः राशिस्थितिभेदेन दीर्घमध्याल्पायूंषि प्रोक्तानि तथैव लग्न जन्मलग्न=
चंद्राभ्यामप्युच्यते एवं मंदचंद्राभ्यां मंदचंद्राभ्यां लग्नेंदुभ्यां एवं सर्वोक्तिप्रका
रेण दीर्घमध्याल्पायूंषि विचार्याणीत्यर्थः पितृकालतश्च जन्मलग्नहो
रालग्नाभ्यां च सर्वोक्तिप्रकारेण दीर्घमध्याल्पायूंषि समानेयानि तथा च त्रि
युगलेन=२ विधद्वंद्वेन दीर्घमध्याल्पायूंषि त्रेधा समानेयानीति पर्यवसितोऽर्थः होरा
लग्नानयनं तु पूर्वमेवोक्तं एतदुक्तं वृद्धैः लग्नेशारं ध्रुपत्योश्च "लग्नहोर्ल
ग्नहोरयोः" सत्राल्पेवं प्रयुंजीयात् संवादाद्दायुषां त्रये" चरे चर स्थिरद्वंद्वाः

लग्नाष्टमेशयोरेकः लग्नचंद्रयोरपरः लग्नहोरयोरन्य इति पक्षत्रयं ॥ सर्वपक्षेष्वेदं

स्थिरे द्वंद्वचरास्थिराः ॥ द्वंद्वे स्थिरोभयचराः ॥ दीर्घमध्याल्पकायुषः प्रथमयो

२ रित्यादि सूत्रत्रयसंग्राहकश्चेत्यर इति प्रस्तार श्लोकः प्रस्तारश्चकोष्ठरूपः अ

थ त्रिविधेष्वायुर्दायनिर्णयोपायेषु त्रयाणामेकाकारायुःप्रदत्वे निर्विवादमे

व द्वयोरेकाकारायुःप्रदत्वेऽपरस्य निजायुःप्रदत्वे निर्णयमाह संवादात्प्रामा

ण्यं प्रकारद्वयेन यादृशमायुरायाति तदेव ग्राह्यं न त्वेकेनागतमिति अथ

त्रयाणां पक्षाणां वैरूप्ये ग्राह्यपक्षमाह विसंवादे पितृकालतः त्रयाणामपि प

क्षाणां विसंवादे वैरूप्ये सति जन्मलग्नहोरालग्नाभ्यामागतमायुर्ग्राह्यमित्य

र्थः सर्वत्रैव विसंवादे लग्नहोराभ्यामेवायुःप्राप्ते अपवादमाह पितृलाभगे

चंद्रे चंद्रमंदाभ्यां लग्ने सप्तमे वा चंद्रे स्थिते सति चंद्रलग्नाभ्यामागतमायुर्ग्रा

ह्यमित्यर्थः अल्पायुष्यादिकं स्पष्टीकृतं द्वात्रिंशात्पूर्वमल्पायुर्मध्यमायुस्ततो २

भवेत् चतुःषष्ट्याः पुरस्तात्तु ततो दीर्घमुदाहृतमिति द्वात्रिंशच्चतुःषष्टिवर्ष

व्याप्तिरूपेष्वायुर्दायेषु स्पष्टीकरणं द्वेधोक्तं पूर्णमादौ हानिरंतेऽनुपातो मध्य

षट्त्रिंशत्सप्ततिरब्दोत्तरशतात्मकेषु च त्रिंशद्धाशीतिविंशत्युत्तरशतात्मकेषु अन्या

द्वारेषु वा सामान्यतः समागतेषु आयुर्दायेषु स्पष्टीकृतं ॥ २

तोभवेत् राशिद्वयस्य योगार्द्धं वर्षाणां स्पष्टमुच्यते एवं द्विकानां संस्थितस्य
त्रयाणां स्वस्ववर्त्मनेति अयमर्थः प्रथमयोरित्यादिसूत्रजालेनायुर्निर्णी
तं तत्र दीर्घायुषि समागते मध्यमायुरवधिपर्यंतं निर्विशंकं सिद्धमेव तदु
परि तेन दीर्घायुः खंडे द्वात्रिंशदब्दरूपे कियद्ग्राह्यमिति संशयनिराकरणा
लग्नेशाष्टमेशौ =५ यायं श्लोकः पितृदिनेशौ द्वावपि यद्यंशे भवतस्तदा शेरारंभेतो चेत्तर्हि
तृतीयः =६ तत्रोनैः खंडः पूर्ण एव तद्राश्यंते यदि तौ भवतस्तर्हि तत्खंडस्य विनाश ए तृतीयः =६
व मध्ये त्वनुपातेन खंडैकदेशो ग्राह्यः अनुपातस्त्वित्थं त्रिंशदंशेष्वेत
द्वात्रिंशद्वर्षाणि तर्हि एकेनांशेन किमिति प्राप्तं ३२ तत्र लग्नेशाष्टमेशयोः
पृथक्स्पष्टं विधाय राशीद्वरीकृत्यांशादिरेकत्र २२ ड सात्रैराशिकेन यदाया २४
ति लग्नेशस्याष्टमेशस्य च तयोरागतयोर्वर्षादि खंडयोर्योगं विधाय त
द्योगार्द्धं स्पष्टं भवति अथ यदि दीर्घायुः संबंधि तर्हि चतुःषष्टिमध्ये यो
=दा२ ज्यं यदि मध्यायुः संबंधि तर्हि द्वात्रिंशन्मध्ये योज्यं यद्यल्पायुः संबंधि त
दा प्रथमखंडाभावात्स्वयमेव जन्मप्रभृति वर्त्तमानमायुर्भवति एवं मंदचंद्रयोः
यथायोगार्द्धं एवं चलग्नचतुर्थांशिं षष्ठांशं तत्र योज्यं यथार्द्धं योज्यते तथैवायमपीति भावः =२

पित्रकालयोरपि समागतायुष्यंति मत्खंड स्पष्टीकरणं विज्ञेयं अन्येतु
होरालग्नादिमांशे तु मरणे मंतेन किंचन स्पष्टीकरणमेतत्स्याद्दीर्घमध्या
ल्पकायुषि अनुपातस्तु सर्ववत् अनेन होरालग्नस्यापि स्वावयवत्वं दर्शि अंशादिमत्वं
तं अथ दीर्घमध्याल्पायुर्योगेषु कंचनविशेषं दर्शयति शनौ योगहेतौ
3 कक्ष्याह्रासः यद्यत्र कानि योगेषु लग्नेशाष्टमाद्भिः कर्तृत्वमापन्नः स्या
तदा कस्याह्रासो भवति दीर्घं चेन्मध्यं मध्यं चेदल्पं अल्पं चेन्न किंचनेति
मतांतरमाह विपरीतमित्यन्ये शनौ योगकर्तरि विपरीतं ह्रासो न भ
वति किंतु यथास्थित एवेत्यर्थः आचार्या वदंति" परपक्षं निरस्य
स्वपक्षमाह सूत्राभ्यां न स्वर्क्षतुंगगे सौरे केवल पापदृग्योगिनि च
स्वराशिस्थोच्चगे शनौ तथा शुभदृग्योगरहितकेवलपापदृष्टयोग
विशिष्टे शनौ च न कक्ष्याह्रासः अन्यथा ह्रासो भवत्येव अत्रान्याचार्यमतमे
वानुभवसिद्ध[illegible]मिति सर्वमतसिद्धांकत्वाद्वृद्धिं योगांतरेणोपदिशति
पितृलाभगुरौ केवलशुभदृग्योगिनि च कक्ष्यावृद्धिः लग्नसप्तम

योगुरोसति तथापापदृष्टिपापयोगरहितशुभदृष्टिशुभयोगसहितगुरो
चेकस्यायुर्वृद्धिरित्यर्थः तथाच अनायुषोल्पायुर्वृद्धिः अल्पायुषः मध्या
युर्वृद्धिः मध्यायुषोदीर्घायुर्वृद्धिः दीर्घायुषः षष्ठ्यब्दस्यूर्ध्वमायुर्भवतीति
त्यर्थः आयुषिप्रमाणसिद्धमूर्लोमरणयुक्तांतरापिमरणंभवतीत्याकांक्षा
यामाह मलिनिद्वारवाह्येनवांशेनिधनं द्वारद्वारेशयोश्चमालिन्ये द्वारंवा
ह्यं चेतिसमाहारद्वंद्वः दशाश्रयोद्वारं ततस्तावतिथंवाह्यमित्यग्रेवक्ष्यति
तस्मिन्पाकभोगापरपर्याये द्वारवाह्येमलिनिस्वयंपापेपापयुक्तेपापदृष्टे
चसतिद्वारवाह्ययोर्नवांशेनवांशदशायांनिधनंभवति अत्रनवांशपदे
नप्रतिराशिनवांशमितानवाब्दाग्राह्याः विषमेतदादिर्नवांश इत्यादिना
वक्ष्यमाणनवांशदशेति जन्मकालेआद्यदशाश्रयराशेर्यावत्संख्याकोद्वा
रराशिस्तस्मात्तावत्संख्याकोराशिर्वाह्यमुच्यते द्वारवाह्ययोर्द्वयोरपिमलि
नत्वएवनिधनं नत्वन्यतरस्य एवंद्वारराशेर्द्वारेशस्यचमालिन्येसति द्वार
तदीशाश्रयराशीयनवांशदशायांनिधनंभवतीत्यर्थः निधनयोगापवाद(

तदीशाश्रयराशि[illegible]शिसंबंधीनवांशदशायां=१

Left margin:

यदाषष्ठ्यब्दस्य
ऊर्ध्वमायुर्भवतीति
तदानवांशदशाक
ल्पनाकार्या=

नत्वेकस्येत्यर्थः
=२

Right margin:

मध्येपीतिभा
वः=४

स्थिरदशाविशे
षरूपनवांशद्वा
रवाह्यराशिसंब
धिनोग्राह्याः
यदाभावंस्पष्टी
कृत्यद्वारवाह्यरा
श्यर्थकावस्थेत
स्यग्रहनवांशरा
शावायुरब्दसमा
नीतेमरणमित्य
र्थः एवंचेद्द्वा
दशभावानांस्प
ष्टीकृत्वाग्रहन
वांशायुर्दायरी

माह शुभदृग्योगान्न द्वारबाह्यद्वारेशानां शुभदृष्टिशुभयोगसत्त्वे सति द्वा
रबाह्यद्वारेशाश्रयनवांशदशायां निधनं नेत्यर्थः अथ शुभदृग्योगाभावे
४ पि नवांशकालनिधनापवादमाह रोगेशे तुंगे नवांशवृद्धिः जन्मलग्नादष्ट
मेशे उच्चगते सत्युक्तनिधनयोगे सत्यपि तद्दशायां मरणमुक्तं तदुत्तरं नवां
५ शवृद्धिः नवांशवृद्धिरित्यर्थः ननु राशिवृद्धौ सत्यां कुत्र राशौ निधनमिति
शंकायामाह तत्रापि पदेशदशायां पितृदिनेशात्त्रिकोणे वा तत्रापि दृढपदे
ऽपि पदस्य लग्नारूढस्येशः स्वामी तदाश्रयीभूतराशेर्दशायामंते निधनं
स्यात् अथ जन्मलग्नारूढनवांशदशायां निधनं किं वा लग्नेशाष्टमेशा
भ्यां त्रिकोणे लग्नपंचमनवमान्यतरराशिदशायामंतर्दशायां वा निधनं भवती
त्यर्थः अथ प्रकारांतरेणादीर्घादियोगत्रयमाह पितृलाभरोगेशप्राणिनिकं
टकादिस्थे स्वतश्चैवं त्रिधा लग्नात्सप्तमाच्चैव यावष्ठमेशौ तयोर्यः प्राणीब ४
लीतस्मिन्कंटकादिस्थे लग्नादिकेंद्रपणफर[illegible]रापोक्लिमस्थे त्रिधा योगो भव अत्र राशितो बलं
ति लग्नादिकेंद्रगे तस्मिन्दीर्घायुर्योगः पणफरस्थे मध्यायुः आपोक्लि गाढं यं कारकं योगः
मस्थे स्वल्पायुरित्यर्थः एवं स्वतश्च कारकादपि योगत्रयमिदं बोध्यं तथा प्रथमो भानानि
त्यादिकं=५

पर्यायार्द्धं प्रयच्छति ।नीचस्थो नाशयेत्पर्यायार्द्धमायुषि निश्चिते ।नीचरं ध्वेशसंयुक्ताः ४१

चकारकात्सप्तमाच्च यावत्षष्ठमेशोत योर्येविला तस्मिन्कारके केंद्रादिस्थे दी
र्घमध्याल्पायुर्योगा भवंतीत्यर्थः अथैतद्योगानामपवादमाह योगात्स
मस्थे स्मिन्विपरीतं योगा जन्मलग्नसप्तमात्समे नवमे स्वस्मिन्कारके
सति विपरीतं पितृलाभेत्यादिसूत्रोपदिष्टयोगा न स्युः किंतु दीर्घं चेन्म
ध्यमं मध्यं चेदल्पं अल्पं चेन्न किंचिदित्यर्थः वैपरीत्यं तु दीर्घं चेदल्पं अल्पं
चेद्दीर्घं मध्यं चेन्मध्यममेवेति तु संप्रदायविदः आयुर्दायविषये विशेषमाह ।
ई॰श॰ः एकोष्टमेशः स्वोच्चस्थः पर्यायार्द्धं प्रयच्छत्यथग ग्रहा विनाशयंत्येवं
नि॰मि॰ते परमायुषि उच्चरं ध्वेशसंयुक्ता ग्रहैः प्रत्येकमुन्नयेत् एकैकमर्द्धप
र्यायं परमायुषि निश्चिते अयमर्थः आयुः पितृदिनेशाभ्यामित्यनेनाष्ट
मेश उच्चस्थश्चेत्स्वपर्याये स्वदशार्द्धमधिकं ददाति नाथांतारतिरीत्या या
वदायुरायाति तस्मिन्पुनरपि तदर्द्धमधिकं योज्यमिति यावत् अष्टमेशो नी
चराशिगश्चेदायुष्यर्द्धं नाशयेत् एवमेव नीचाष्टमेशयुक्ता ग्रहा अपि स्वस्तदीय
मानायुष्यर्द्धमर्द्धं नाशयेयुः एवमुच्चाष्टमेशसंयुक्ता ग्रहास्तदीयमानायु
षि स्वदशार्द्धमधिकं दद्युः एवमेव लग्नेशादयोपि ग्रहा उच्चनीचगुणेतीह

द्विह्रासौकुर्यादितिसंप्रदायः अस्मिन्प्रकरणे किंवलंग्राह्यमित्याकांक्षायामा
ह राशितःप्राणः अत्रराशितोवलंग्राह्यं कारकयोगः प्रथमोभानामित्यादिकं
५ वक्ष्यमाणराशिवलंग्राह्यं अत्रांशाधिक्यवलंनग्राह्यमित्यर्थः अथप्रकारांतरे
णमध्यायुर्योगमाह योगेशयोः स्वतः एकैकयोगेवामध्यं लग्नात्सप्तमाच्चदे
5 गेशयोरष्टमेशयोः स्वतःकारकेणैकेसतियोगेवासतिपितृलाभेत्यादिसूत्रे
णप्राप्तदीर्घायुषामपिमध्यायुरेवभवतीत्यर्थः जातकपारिजातेलग्नस्यास्मि
न्नंशेकरकस्यप्राधान्यादष्टमेशयोगेनआयुषोह्रासएवेतिभावनीयं अ
पदीर्घादियोगेषुकस्याह्रासमाह पितृलाभयोः पापमध्यत्वे कोणपापयोगे
वाकस्याह्रासः स्वस्मिन्नप्येवं स्वस्मिन्पापेनीचे, तुंगेअशुभसंयुक्तेच पितृ
लाभयोर्लग्नसप्तमयोर्द्वयोरपिपापग्रहमध्यवर्त्तित्वेकस्याह्रासोभवति ल
ग्नकुंडल्यां द्विद्वादशयोः षष्ठाष्टमयोश्चपापयोगेसतिपापमध्यवर्त्तित्वंभवति ५
एवंलग्नसप्तयोः केवलपापयोगेवाकोणे त्रिकोणेषु लग्नपंचमनवमेषुपाप
योगेवाकस्यायाह्रासोभवति स्वस्मिन्कारके [redacted]प्येवं लग्नकुं
डलीवद्भवति अयमर्थः कारकराशेस्तत्सप्तमराशेश्चपापमध्यत्वे एकोयोगः

कारकात्सप्तमयोस्त्रिकोणे सर्वत्र पापयोगे सति द्वितीयोयोगः कस्याह्रा
सायतस्मिन्कारके पापे नीचे सति कस्याह्रासः ४ कारके पापेऽतुंगेऽनुच्चरा
शोऽशुभसंयुक्ते च सति कस्याह्रासो भवतीति द्वितीयोयोगः अथ कस्या
ह्रासयोगेऽपवादमाह अन्यदन्यथा अन्यथा लग्नसप्तमयोः कारकसप्तम
योर्वा शुभग्रहमध्यगतत्वे लग्नकारकाभ्यां कोणे शुभयोगे वा कारके शुभे
नीचे वा कारके शुभे तुंगे शुभसंयुक्ते च वा अन्यत्कस्या वृद्धिरित्यर्थः तथा
च सर्वत्र योगे पापात्मके कस्याह्रासः शुभात्मके कस्या वृद्धिः शुभपापरहि
ते न वृद्धिर्न ह्रास इति बोध्यं अथ ह्रासवृद्धिप्रकारान्गुरावपि दर्शयति गु
रौ च एवमित्यर्थः गुरोर्द्वादशषष्ठाष्टमात्रिकोणेषु पापयोगेषु सत्सु
कस्याह्रासः गुरौ नीचेऽतुंगेऽशुभसंयुक्ते च कस्याह्रासः अन्यथा च
इन्यथेति प्राग्वद्योजनं तत्राऽपवादं दर्शयति स्थलेंदुशुक्रयोरेकराशिवृद्धिः
उक्तस्थाने शुभाशुभग्रहयोगप्रकरणे स्थलेंदुशुक्रयोर्योगे सति न कस्या वृ
द्धिः किंत्वेकराशिवृद्धिरेवेत्यर्थः पापयोगे न कस्याह्रासः उक्तः तत्रा
पवादं दर्शयति स्थानो विपरीतं स्थानानुक्तस्था [illegible] नगे सति न क

चरादीनां द्वादशराशिषु त्रिभिस्त्रिभिराशिभिरेकैकः खंड इति चत्वारः खंडा भवंति तेषु खंडेषु मध्ये यस्मिन्प्रथमयोगः तस्मिन्खंडे मरणं भवतीत्यर्थः ॥ यद्वा दीर्घमध्याल्पायुर्योगभेदेन लग्नादिषु त्रेधा खंडकरणाद्दी

स्याह्रासः किं त्वेकराशिह्रास एवेत्यर्थः अत्र चंद्रभुक्तयोनीनां घीयुक्तादियोग
प्राधान्येन योगकर्तृत्वेन गृहीतं तरेषु योगकरेष्वपि एकाकारोदः छिद्री वशातोयः खंडः
६ सोवास्यान्नतु कस्यायाइत्यर्थः अथ सकलायुर्योगापवादत्वेन नि समागतस्तस्मि
धनयोगं स्थिरदशामालंब्याह स्थिरदशायां यथाखंडं निधनं खंड न्खंडे निधनंभ
6 मनतिक्रम्य यथाखंडं स्थिरदशायां शशिनंदपावका इति वक्ष्यमाण वतीत्यर्थः =
याः दीर्घमध्याल्पायुर्भेदेन लग्नादिषु त्रेधा खंडकरणाद्यः खंडः समा
गतस्तस्मिन्नेव खंडे निधनं भवतीत्यर्थः एवं च वक्ष्यमाणप्रकारेण निध
नाश्रयखंडात्पूर्वखंडे निधनलक्षणक्रांतराशेर्दशायामागतायामपि न
निधनं स्यात् किंतु क्लेशः स्यात् अथ दीर्घमध्याल्पायुर्भेदेन मरणखंडे
निर्णीते च विशेषतो मरणकालज्ञानमितः संभवतीत्यत्राह तत्रत्वविशे ६
षः तत्र निधने रूत्तविशेषः राशिविशेषोस्तीत्यर्थः सराशिविशेषः
कइत्यपेक्षायामाह पापमध्ये पापकोणे रिपुयोगयोः पापे वा पापद्वयम
ध्यगतराशिदशायां प्रथमदशाप्रदराशेस्त्रिकोणे द्वादशाष्टमयोर्वा पा
सामान्यतः खंडेषु मरणं भवतीत्युक्ते कस्मिन्खंडे कस्मिन्राशौ वा निधनं स्यादिति शंकायामाह = ८

लग्नात्कारकाद्वा पापाक्रांतत्रिकोणराशिदशायां पापाक्रांतद्वादशाष्टमराशिदशायां निधनं भवतीत्यर्थः तथा
चक्रमेण जन्मतः प्रवृत्तासु दशासु यादृशो केरीआ पापाक्रांतराशेः कस्यचिद्भवेत् तर्हि तदानीं निधनं इत्यर्थः॥२
दृष्टिनंदे ति
पयोगे सति तद्राशिदशायां निधनं भवति एतदुक्तं हृहै: शुभमध्येम
तिर्नैव पापमध्येमतिर्भवेदिति लग्नात्कारकाद्वा पापाक्रांतद्वादशाष्ट
मराशिदशायां वा निधनं भवतीत्यर्थः पुनरपि निधनराशिविशेषमाह
तदीशायोः केवलस्त्रीलेंदुशुक्रयोर्दृष्टौ वा द्वादशाष्टमेशयोः केवलस्त्री
कोर्थः॥५ लेंदुशुक्रदृष्टौ सत्यां ग्रहांतरदृष्टिविनिर्मुक्तस्त्रीलेंदुशुक्रदृष्टौ सत्यां इत्य
र्थः शुक्रमात्रदृष्टौ सत्यां वा द्वादशाष्टमराशिदशयोर्निधनं भवतीत्यर्थः
बहुवर्षव्यापिन्यां दशायां केदा मरणमित्याकांक्षायामाह तत्राप्याद्य
न्तारिनाथोघदस्पनवभागाद्वा तत्रापि निधनस्थानत्वेनोद्दिष्टासु पाप
नोम नाथ
मध्यराश्यादिदशासु आद्यन्तारिनाथौ प्रथमदशाप्रदराशि तत्षष्ठरा
शिनाथौ ताभ्यां दृष्टो यो नवभागो नवांशकुंडलोमं तद्दशायां वा निधनं
भवतीत्यर्थः ननु आद्यशब्देन दशमराशिः अरिशब्देन षष्ठराशिरि
ति केश्चित् व्याख्यातं तत्र वैषम्ये बीजाभावादरिशब्देनाष्टमराशिः कुतो
न गृह्यत इति एवं चेन्मुनेस्तात्पर्यं तर्हि दुष्कं तं तु ● नाथदृस्पनव

रुद्रत्रिकोणांतं रुद्रत्रिकोणदशांतमायुर्भवति प्रथमत्रिकोणांते द्वितीयत्रिकोणांते। तृतीय
त्रिकोणांते वायुः समाप्तं भवति = ६

भावाद्वेति कुतो नो क्तमित्युक्तं अथ निर्याणदशाविशेषं प्रकारांतरेणाह
रुद्रग्रहं लक्षयति विलग्नलाभभावेशप्राप्तोरुद्रः लग्नसप्तमाभ्यां यावष्टमेशो — यत्र यत्र दिलप दं तत्र जन्मलग्न
तयोर्यः प्राणी वलवान् स रुद्रसंज्ञो ग्रहो भवतीत्यर्थः द्वितीयरुद्रमाह अप्रा — मवतिसंकेतः = २
प्यपि पापदृष्टलग्नात्सप्तमाद्वाष्टमाधीशो दुर्बलः सोपि पापग्रहदृष्टश्चेद्रु
द्रः स्यात् तथा च द्वौ रुद्रौ भवतः प्राणी अप्राणी चेति प्राणीरुद्रस्य फलमाह
प्राणिनि शुभदृष्टे सति रुद्रश्रूलांतमायुः बलवति रुद्रे शुभदृष्टे सति रुद्रश्रू
लांतं रुद्रात्प्रथमपंचमनवमदशांतमायुर्भवति अल्पमध्यदीर्घायुर्योगभे
दात् प्रथमद्वितीयत्रिकोणांते वाप्यायुः समाप्तं भवतीत्यर्थः अप्राणि [illegible]
तृतीय रुद्रविशेषमाह तत्रापि शुभयोगे तत्र द्वितीयरुद्रेपि शुभयोगे सति रुद्रश्रू
लांतमायुर्भवति न तु शुभदृष्टेति भावः उक्तयोगेऽपवादमाह अर्कपाप
योगेन रविं विहाय इतरपापयोगे सति इदं फलं न [illegible] विलायरतरस्य योने ६
सति योगोयं भवतीत्यर्थः भवति रवियोगे [illegible] तु नास्य फलस्य भंग इति अ
थ रुद्रद्वयस्य गुणविशेषबलफलं दर्शयति मंदारेंदुदृष्टे शुभयोगाभावे पा
पयोगे वि वा शुभदृष्टो वा परतः [illegible] प्राणिन्यप्राणिनि वा रुद्रे मंदारेंदुदृष्टे
रविं विहाय इतरपापयोगे सति योगोयं भवतीत्यर्थः यद्वा इदं फलं न भवति। रवि
योगे सति नास्य फलस्य वा भंग इति = ८

शुभयोगाभावे एको योगः मंदारेंदुद्वष्टकेरुद्रद्वये पापयोगेपि वा द्वितीयो योगः
मंदारेंदुद्वष्टकेरुद्रद्वये शुभद्वक्षो वा ससोत् तृतीयो योगः प्रथमयोगे शुभयोगा
भावे इत्यनेन पापयोगे द्वितीययोगे वक्रे शुभपापरहितरुद्रे अयमर्थः
संपन्नः योगत्रये संस्पर्शे सति रुद्रफलं तात्परतोऽग्ने आयुः समाप्तिर्भवती
त्यर्थः वाकारद्वयमनास्थायामित्युक्तो योगद्वयपरमिति पंथ्येरुक्तं तत्
न्न वाकारद्वयस्यानास्थाकल्पनायां प्रमाणाभावात् योगत्रयपरमेव
वाकारं वाद्वयेन लभ्यत इति अस्मिन् प्रकरणे शुभपापाः हृष्टेरुक्ताः अ
र्कारमंदफणिनः क्रमात् क्रूरा यथाश्रयं चंद्रोपि क्रूर एवात्र क्वचिदंगार
काश्रये गुरुध्वजकविज्ञाः सुः यथासर्वं शुभग्रहो इति अयमर्थः अ
र्काकीधाउत्तरोत्तरं यथाश्रयं क्रूरराशिगताः क्रूरा भवंति शुभराशिगता
स्तु न पापाः किंतु शुभा एव गुर्वादयस्तु शुभाः यथासर्वं बुधात्कविः कवेः
केतुः केतोर्गुरुरिति क्रमेणोत्तरं शुभाः क्रूरग्रहाणां यथा क्रूराश्रये क्रूर

त्वं शुभाश्रयेशुभत्वं तथागुर्वादीनामपिशुभाश्रयेशुभतानक्रूराश्रयेशुभ

८ ता एवमेवक्रूरैकत्वं प्रत्येकंशुभराशिस्थः उच्चस्थोवाबुधःशुभः गुरुशु

क्रौचसौम्यस्थौ ततोऽन्यत्राशुभाःस्मृताइति यदिमूलेमृतिस्तर्हिकस्मिन्

मूलेस्यादित्यत्रक्रूरैर्विशेषानिरूप्यः पापमात्रस्यमूलत्वेप्रथमस्त्रैमृतिः

र्भवेत् मिश्रेमध्यममूलत्वेशुभमात्रेत्वंत्यमेमृतिरिति अस्यार्थः द्वौक्रूरौ

यदिपापौतर्हिप्रथममूलेमृतिःस्यात् यद्येकोक्रूरःशुभोऽपरःपापस्तर्हि

मध्यममूलेमृतिः द्वावपिक्रूरौयदिशुभौतर्ह्यंत्यमूलेमृतिःस्यादिति

क्रूराश्रितैराशावपिकदाचिन्मरणयोगमाह क्रूराश्रयेपिप्रायेण क्रूराश्र

यराशावप्यायुःसमाप्तिर्भवतीत्यर्थः प्रायशब्दात्क्रूराः सर्वेपरतोवाआ

युःसमाप्तिर्भवतीतिध्वनितं तत्रविशेषमाह क्रियेपितरिविशेषेण

मेषेजन्मलग्नेसतिविशेषेणक्रूराश्रयेआयुःसमाप्तिर्भवति क्रूरद्वय

साधारणेनफलविशेषमाह द्वंद्वेक्रूरेतदंतंप्रायः लग्नादष्टमराशौक्रूरद्व

द्वंद्वेद्विस्वभावराशौक्रूरेप्राप्तिनिअप्राप्तिनिवासतितदंतंक्रूराश्रयाद्विस्वभावांतंप्रायः

प्रायेणायुर्भवतिप्रायपदाद्योगभेदेनक्रूराश्रयद्विस्वभावराशेः सर्वेपरतोवाभवतीतिगम्यते=१

यद्यप्राप्तिक्रूरयोगोकिंचि न्यूनतातर्हिक्रूराश्रयं घ्नः नपरंतोत रणमित्याह=५

प्राप्तिअप्राप्ति=२

रुद्रशूलेयद्यायुः समाप्तिस्तर्हि शूलमहादशायां द्वादशराशीनां याअंतर्दशास्तासु या रुद्रशूलांतर्दशा तस्यां निधनमित्यर्थः = ५

सति रुद्राश्रमांतं प्रायेणायुःसमाप्तिर्भवति इति योगभेदेन निधनस्थानं दर्शय
ति प्रथममध्यमोत्तमेषु वा तदायुषां तत्तदायुषामल्पमध्यदीर्घायुर्योगव
तां प्रथममध्यमोत्तमेषु प्रथमद्वितीयतृतीयरुद्रशूलेषु वाक्रमेणायुःसमा
प्तिर्भवति रुद्रशूलराशिमहादशायां निधनेनिश्चिते कस्यामंतर्दशायां निध
नमित्याशंक्याह शूले चेत्तदंतःशूले रुद्रशूले यद्यायुःसमाप्तिस्तर्हि घा=
रुद्रशूलमहादशायां रुद्रशूलांतर्दशायां निधनमित्यर्थः अथ शूले चेदि
त्युक्त्या रुद्रशूलनिर्याणयोगस्सत्स्वपि वलवत्तरयोगांतरवशतो रुद्रशू
लनिर्याणवाधोपि भवतीति ध्वनितं अथ फलविशेषकथनाय महेश्व
दर्शयति=१ रग्रहं लक्षयति स्वभावेशो महेश्वरः स्वात्मकारकाक्रांतांशोऽष्टम
राशीशो महेश्वरग्रह इत्यर्थः स्वोच्चे स्वगृहे रिपुभावेशः प्राणी यदि कार
कादष्टमेशः स्वोच्चे स्वगृहे वा स्यात्तदा कारकाद्द्वादशाष्टमेशयोर्मध्ये अष्टमराशीशः =२
अग्रहादिति यो वली स एव महेश्वरः स्यान्न तु स्वभावेश इत्यर्थः द्वावपि तुल्यवलौ
भावेन =२ चेत्तदा महेश्वरो भवत एव स्वोच्चेस्वगृहे इति पाठे तु कारकोच्चराशौ ग्रह
कारकोच्चराशौ ग्रहयुक्तस्ते=१

कारकग्रहात् तस्य षष्ठो ग्रहः स महेश्वर इत्यर्थः रविचंद्रमंगल इत्यादि ॥ ५

कारकग्रहात् ॥ २

युक्ते सति कारकाद् अष्टमद्वादशेशयोर्मध्ये यो बली स महेश्वरः अस्मिन्नपि — कारकोच्चराशौ ग्रहयुक्तपक्षे ॥ १

त्रे प्रकारांतरेणायमपि महेश्वर इत्यर्थः प्रकारांतरेण महेश्वरमाह पाता

१ भ्यां योगे स्वस्य तयोर्वा रोगे ॥ ततः स्वस्य कारकस्य पाताभ्यां राहुकेत्वोरन्यत

संति ४ रेण योगे तथा कारकाद्रोगे अष्टमे तयो राहुकेत्वोर्योगे वा सति कारकाद्

क्यादि प्रसिद्धगणनया पाताभ्यां ततः षष्ठो ग्रहो महेश्वरो भवति द्वित्राणां

महेश्वराणां संभवे यो बली स एव महेश्वरः स्यादिति अथ ब्रह्मग्रहमाह

प्रभुद्भावात् वैरिरीःफपाणि पितृलाभप्राण्येनुचरो विषमस्थो ब्रह्मा

पितृलाभप्राणीति सूत्रे मध्ये स्थितत्वाद् देहलीदीपकन्यायेन लग्नसप्तम

योर्बलवद्राशिस्तस्मात्षष्ठाष्टमद्वादशराशिस्वामिनां मध्ये यो बलवान्

भवन्नेव लग्नतत्सप्तमराश्योर्मध्ये यो बलवद्राशिस्तत्पृष्ठगः सन् मे

षमिथुनादि विषमराशिगतः स्यात् स एव ग्रहो ब्रह्मा भवतीति लग्नस्य पृ

ष्ठराशयः सप्तमादि द्वादशांतं सप्तमस्य पृष्ठराशयो लग्नादि षष्ठांतं वा

ध्यं प्रकारांतरेण ब्रह्माणमाह ब्रह्मणि शनौ पातयोर्वा ततः शनौ ब्रह्मणि

लग्नात् षष्ठाष्टमद्वादशेशेषु यो बलवान् मेषादि विषमराशिगतः लग्नसप्तमयो राश्योर्यो

बलवान् तदनुचरस्तत्पृष्ठ [illegible] तत्र युक्तो ग्रहो ब्रह्मा भवतीति ॥ ३

श्रीः

बललक्षणाक्रांते सति पातयो राहुकेत्वोः बलिनोः सतोस्तत्स्थाने राहोः
केतोर्वा ततः षष्ठो ग्रहो बली भवतीत्यर्थः ननु बललक्षणाक्रांततया प्र
सक्तेः शन्यादिर्बली स्यात् बहूनां बललक्षणाक्रांतत्वे कतमो बली स्या
दित्याशंकायामाह बहूनां योगे स्वजातीयः बहूनां ग्रहाणां बलयोगे स
ति स्वजातीयः कारकजातीयोऽधिकांशको बली स्यादित्यर्थः अत्रैव
विशेषमाह राहुयोगे विपरीतं राहोर्बलिना सह संयोगे सति विपरीतं
बहूनां बलिनां मध्ये यो न्यूनांशकः स एव बली स्यात् शनिराहुकेतूनां
मेत १ नैतुरस्युस्या बलत्वाभावात् बलत्वे सति तु राहोर्बलित्वयोगे राहुर्न्यूनां
शकोऽपि बली स्यादित्यर्थः स्यादिति पुनः प्रकारांतरेण बलिनमाह अथा
स्वभावेप्यभावस्य कारकादष्टमेषः कारकादष्टमस्यश्च ग्रहो बली
स्यात् यत्तु अष्टमेषत्वे सति अष्टमराशिगतत्वमेव बलत्वे प्रयोजकत्व
मिति मतं तन्न तथा सति विवादप्रसक्त्यभावेन एतत्सूत्रमनन्वितं स्या
त् न त्वेतत्सूत्रं वान्वितं व्यवहितत्वात् यथा स्वारस्यप्रसक्तेः बहूनामिति सू

एवं सत्योन्वयीति तत्सूत्रं नहि =१

अंशाधिक्येन=२

वेलैव शंकायाः उक्तीणत्वाच्चेति अष्टमेशाष्टमस्थयोरेकत्वे निर्विवा
दं ब्रह्मत्वं तयोर्भेदे तु कतमो भवेदित्यत्राह विवादे बली विवादे द्वयो
१० र्ब्रह्मत्वे सति यो बली स एव ब्रह्मा स्यात् अथवा सर्वेषु ब्रह्मत्वसु समानां प्र
वस्तु यो ऽग्रहा तस्य ग्रह इत्यादि बलीयः सब्रह्मा भवतीत्यर्थः अथ ब्रह्म
महेश्वरयोः फलमाह ब्रह्मणो यावन्महेश्वरस्तु दशांतमायुः स्थिर
दशायां ब्रह्मग्रहाश्रितराशिमारभ्य महेश्वरराशिदशापर्यंतमायुर्भ
वतीत्यर्थः महादशायां निधनाश्रयीभूतामंतर्दशामाह तत्रापि महे
श्वरभावेषु त्रिकोणगे तत्रापि महेश्वराश्रितराशि महादशायामपि
महेश्वराश्रितराशितोऽष्टमराशिनाथस्य यस्त्रिकोणराशिः प्रथम
पंचमनवमात्मकोराशिस्तस्यैकाद्यात्मकोयां तद्दशाकालस्तत्र मृ १०
त्युः स्यात् रसं ७२ अब्द इति द्वादश वर्षेत्ति च्छाशिदशेत्यभिप्रायेण
न्यूनसंख्यायाद्दशासत्वेत्ववदतो न्यूनमंतर्दशास्वप्यानेयमेव अथ
स्तत्र वयेन मारकेग्रहं लक्षयति स्वकर्मवित्ते पितृरोगनाथप्राणी

षष्ठाधिपस्तु प्रायेण बहुप्रकारेण मारक इत्यर्थः तथा च षष्ठेशो मारको मुख्यः मारक इत्यर्थः मारकग्र
हस्य फलमाह तद्दशायां निधनं मारकग्रहाश्रितो मारकस्वामिको वा यो राशिस्तन्महादशायां च
मारकः छिद्रनाथः प्रायेण स्वस्मादात्मकारकात् तृतीयषष्ठद्वादशाष्ट
मेशानां मध्ये यो बलवान् स मारकग्रह इत्यर्थः सर्वेषां समबलत्वे सर्वेऽपि
मारकाः स्युः बहूनां मारकत्वे कस्य दशायां निधनमित्याशंकायामा
ह मध्ये दीर्घायुषां यत्र यत्र यस्य संभवस्तद्राशिदशायां निधनमित्यर्थः
कर्तापि (षष्ठेशस्तु पापः चरस्थिरादिरूपायां निधनं स्यादित्यर्थः) मारकमहाद
शायां निधनाश्रयीभूतामंतर्दशामाह तत्रापि कालादिपुरोगाच्छिद्रनाथा
पहारे तत्रापि मारकग्रहदशायामपि कालात्कारकस्य तृतीयषष्ठद्वादशाष्ट
मषष्ठेशानामंतर्दशायां निधनं स्यादित्यर्थः एषां मध्ये बलवतां तद्दशायां
निधनमिति विवेचनीयं अत्रायं विशेषो वृद्धकैः चरे चर स्थिर द्वंद्वा इति
यो राशिरागतः स एव मारको राशिर्भवतीति विनिर्णयः बहुराशिसमा
वेशे बलवान् मारकः स्मृतः इति अयं भावः पितृदिनेशादिद्विकानामा
श्रयीभूतो यो राशिः स मारकः ते राशयो यदि बहवस्तर्हि अग्रहास्तग्र
ह इत्यादिबलेन यो राशिर्बलवान् स मारकस्तद्राशिदशायां तदीयाश्रय

रस्थिरादिरू
पायां निधनं
भवतीत्यर्थः
यदि बहवो मा
रकग्रहाः स
मबलास्तत्र स
र्वेति रोगादीनि
निर्दिश्य षष्ठेद
शायामेव मुख्य
तो निधनं बोधि
तं बहुमा
रकत्वे तेषु न
नातिरेकित्वेऽस
ति दुर्बलमार
काश्रितराशि
दशायां रोगः
भवतीत्यदशा
यां महारोगो नि
धनं वेत्याह
समम् = ५

अत्र षड्दोपरंहरणानि षष्ठाष्टमेशो भवतो मारकावष्टमेश्वरः प्रायेण मारको राशिदशास्वत्रा विशेषतः षष्ठे पापभूयिष्ठे षष्ठेशो मुख्यमारकः षष्ठाष्टमे केको ग्रहो वापि ग्रहो मारक इष्यते मध्यायुषि मृतिः षष्ठदशायामष्टमस्य वा षष्ठत्रिकोणस्य पुनर्दीर्घायुषि षष्ठेशमवेत् षष्ठवलयुतेतस्यात्रिकोणे मृतिमादिशेत् षष्ठेशाश्रे बलान्ताः स्यात्रिकोणे च मृतिं वदेत् अयमस्यैव समस्तादिकारको दिक्षास्वपि बलिनः शुक्रस्य शनिमार्ग्रोहि षष्ठाष्टमादिकं इति अयमर्थः अत्र षष्ठादि

११ राशिदशायां वा मृतिरिति अपरे तु चर इत्यादिनायुर्यत्ततसमा

॥ श्रुचितो भवेत् यो राशिः सतु विज्ञेयो मारकः सूत्रसंमत इति (

चर इत्यादिश्लोकेन यद्दीर्घायुः समागतं दुर्ग्गमित्यादिना स्पष्टीकृ

तं तदायुर्यद्राशौ समाप्तिस्तद्राशिरेव मारकस्त्वर्थः॥ ॥इति

जैमिनिसूत्रव्याख्यायां सुवोधिन्यां द्वितीयाध्यायस्य प्रथमः पादः

॥ ॥पित्रादीनां निधनकालं वोधयितुं पित्रादिकारकमुप

दिशति रविशुक्रयोः प्राणी जनकः सूर्यभार्गवयोर्मध्ये यो व

अत्र हात्त ग्रहे तिरोत्या = ८ ली वा स पितृकारकः स्यात् चंद्राशयोर्जननी चंद्रभौमयोर्मध्ये

यो वली स मातृकारकः अश्राप्त्याविपापदृष्टः रविशुक्रयोश्चंद्रा

रयोश्च मध्ये यो निर्वलिः सोपि पापग्रहदृष्टश्चेद्यथाक्रमं पितृमा

तृकारकतां लभते अथप्राप्ति पित्रादिकारकस्य फलमाह प्राप्ति

त्रिशुभदृष्टे तच्छूले निधनं मातापित्रोः पितृकारके मातृकारके वा

तस्य प्राणिकारकस्य भावेशो ऽष्टमेशो स्यष्टबले कारकादधिकबले सति अष्टमेशा
श्रितराशित्रिकोणदशायां निधनं = २

प्राणिनि शुभदृष्टे सति पितृमातृकारकाश्रितराशितः त्रिकोणदशा
यां पितुर्मातुश्च मरणं ज्ञेयं द्विविधकारकस्य फलमाह तद्भावेशस्य
ष्टबले तत्सूलइत्यन्ये ताभ्यां प्राण्य प्राणिकारकाभ्यां भावेशो ऽष्टमे पितृमा शे ३
तृकारकात्स्यष्टबलेऽधिकबले सत्यष्टमेशाश्रितराशेस्तत्त्रिकोण
राशिदशायां निधनं भवतीत्यन्ये प्राहुः अधिकबल इति बलत्वेस्यष्ट
बल इत्युक्तत्वाच्छाधिक्यबलमत्र ग्राह्यं. आयुर्विचारवत् पित्रादीनामा पितृलाभपुत्र
युर्विचारणीयं अनयैव तत्कारकं प्रकारांतरोक्तनिर्याणलग्नतद्दशा प्राप्त्यादिरिति
दिकं च विचार्यमित्यर्थः पितृनिधने विशेषमाह अर्केज्ययोगे तदा नेन = १
श्रयेक्रियेऽन्त्ये लग्नमेषदशायां पितुरित्येके क्रिये लग्नात् द्वादश
राशौ तदाश्रये ऽर्कबुधाश्रये सिंहमिथुनकन्यान्यतरराशिसत्त्वे ऽर्केज्य २४
योगे सति लग्नमेषदशायां लग्नात्पंचमराशिदशायां पितुर्निधनं स्या
दित्येके वदंति लग्ने इति पाठे क्रिये मेषराशौ रविज्ययोगाश्रये लग्ने स
ति मेषस्य दशायां पितुर्निधनमित्यर्थः अथ बाल्य एव मातापित्रोर्म

गुरोः पतिकलत्रादिकारकत्वात् तदाश्रितत्रिकोणदशायां कलत्रनिधनं ज्ञेयम् ॥४

रणयोगमाह व्ययेऽर्कपापमात्रदृष्टयोः पित्रोः प्राक्द्वादशाब्दात् पित्रोः मा
१२ तापितृकारकयोः प्राणिनोरशालिनो वा रविरहित पापमात्रेण दृष्टयोः सतो
द्वादशाब्दात्पूर्वमेव मातापित्रोर्यथाक्रमं निधनं भवति रविशुभदृष्टौ
नायं योग इति स्त्रीनिधनमाह गुरुफले कलत्रस्य गुर्वाश्रितत्रिकोण
दशायां पत्नीनिधनं स्यात् एवमन्येषामपि निधनमाह तत्तत्फले ते
षां पुत्रमातुलादिकारकराशेस्त्रिकोणदशायां पुत्रमातुलादिनिधन
मित्यर्थः मरणे शुभाशुभभेदं दर्शयति सूत्रैः कर्मणि पापयुतदृष्टे दु
ष्टं मरणं लग्नात्कारकाद्वा तृतीये पापेन युते दृष्टे वा दुष्टं मरणं भवति
शुभं शुभदृष्टियुते लग्नात्कारकाद्वा तृतीये शुभेन युक्ते दृष्टे वा शुभं म
रणं स्यात् अग्निजलपातबंधनादिप्रयोज्यं दुष्टं मरणं ज्वरादिरोगप्र
योज्यं शुभमुच्यते मिश्रे मिश्रं शुभपापयोर्द्वयोरपि दृष्टौ योगे वा शुभा १२
शुभात्मकं मरणमित्यर्थः मरणनिमित्तानि दर्शयति आदित्येन राज
मूलात् तृतीये रवियोगे दृष्टौ वा सतां राजहेतो मरणं चंद्रेण यक्ष्मणा

बुधेन तत्तत्पर्वतादेर्नुर्मरणं

तृतीये चंद्रेण युते दृष्टे वा यक्ष्मणादितो निधनं कुजेन व्रणायास्त्राग्निदा
हाद्यैः तृतीये एव कुजेन युते दृष्टे वा व्रणादितो मरणं शनिना वातरोगा
त् तृतीये शनिना युते दृष्टे वा वातरोगतो निधनं मंदमांदिभ्यां विषसर्प
जलोद्बंधनादिभिः तृतीये शनिगुलिकाभ्यां युते दृष्टे वा विषादिभिर्मृ
तं गुलिकस्य षष्ठीकरणमन्यत्रानुसंधेयं केतुना विसूचीजलरोगाद्यैः
तृतीये केतुना युते दृष्टे वा विसूच्यादितो मरणं चंद्रमांदिभ्यां दुगमदान्न
कवलादिभिः हालिकं तृतीये चंद्रगुलिकाभ्यां युते दृष्टे वा कामुकमदादि
नास्त्यवरं मरणं गुरुणा शोफारुचिवमनाद्यैः तृतीये गुरुणा युते दृष्टे
वा शोफादिभिर्निधनं शुक्रेण मेहात् तृतीये शुक्रेण युते दृष्टे वा प्रमेहरो
गान्निधनं मिश्रमिश्रात् तत्तद्रोगदानां बहूनां तृतीये योगदर्शने वा
ऽनेकरोगान्निधनं चंद्रदृग्योगान्निश्चयेन तृतीये तत्तद्ग्रहयोगदर्शने
सत्वे तत्रैव चंद्रदृग्योगदृष्टिसत्वे तत्तद्रोगान्निश्चयेन मरणं भवतीति
वक्तव्यमित्यर्थः एतेन चंद्रदृग्योगाभावे तृतीयस्थानगेनापि तत्तद्र

हेलग्नतत्तद्योगमरणे संदेह इति ध्वनितं अथ निधने देशभेदं दर्शयति स्वस्था
भ्यां शुभैः शुभदेशे पापैः कीकटे अत्र बहुत्वमविवक्षितं तृतीये शुभद्व
१२ न्योगसत्त्वे शुभे देशे पुण्यभूमौ मरणं पापैस्तु कीकटे मगधादिपापदेशे
13 मरणमित्यर्थः शुभपापोभययोगे तु न कोण्यादिशुभे न मगधादिपापु
देश इति मतो ज्ञानाज्ञानपूर्वकं मरणमाह गुरुशुक्राभ्यां ज्ञानपूर्वं अन्यै
रन्यथा लग्नात्कारकाद्वा तृतीये गुरुशुक्राभ्यां युते दृष्टे वा ज्ञानपूर्वं मर
णं गुरुशुक्रातिरिक्तयोगदर्शनाभ्याम् अज्ञानपूर्वकं मरणं फलांतरमाह
लेयजनकयोर्मध्ये शनिराहुकेतुभिः पित्रोर्न संस्कर्ता लग्नद्वादशयो
र्मध्ये शनिराहोः शनिकेत्वोर्वा स्थित्या मातापित्रोः संस्कर्ता न स्यात्
लग्नादि [illegible] लग्नद्वादशमध्यं प्रकटयति लेयादिपूर्वार्द्धं जनकाद्यपरार्द्धं लग्नादि
सप्तमषट्के द्वादशा पूर्वार्द्धं द्वादशाद्युत्तरषट्के शनिराहु शनिकेतुत्वे मातापित्रोः क्रमात्सं सर १२
द्यपरार्द्धे १२ स्कर्त्ता न तथा च लग्नादिषट्के शनिराहु शनिकेतु लग्नादिसप्तमषट्के सतेर
षट्के मातुः संस्कर्त्ता न सप्तमादिषट्के शनिराहु शनिकेतुसत्त्वे पितुः

संस्कर्त्तनितिकर्त्ततार्थः शन्यादित्रिकसत्त्वे इति कुतो नोक्तमिति
चेत राहुकेत्वोरेकस्यानेस्थितेर्वाधत्वादितिनोक्तमिति अपवादमा
ह शुभदृग्योगान्न तत्रलग्नादिद्वादशादिमध्येशुभदृग्योगसत्त्वे स
र्वोक्तयोगोनस्यात किंतुपित्रोः संस्कर्त्तास्यादेव ॥ ॥इतिजैमि
निसूत्रव्याख्यायांद्वितीयाध्यायस्यद्वितीयः पादः॥ ॥ ॥
अथदशाभेदवलभेदादीनाह तत्रादौनवांशदशामाह विषमेतरा
दिर्नवांशः अन्यथादर्शादिः विषमेलग्नेसतिततदादिर्लग्नादिर्नवां
शदशास्यात अन्यथासमराशौलग्नेसत्यादर्शादिः सप्तमराश्यादि
र्नवांशदशास्यात आदर्शः संमुखोभवति संमुखराशिः सप्तमराशिः
सप्तम एवभवति एतद्दशायांप्रतिराशिनवनवाब्दाभवंतीतिनवां
शदशेतिनामधेयंज्ञेयं यत्तुस्थिरराशेःषष्ठराशिश्चरस्याष्टमएवस्व
द्विस्वभावस्यराशिस्तुसप्तमः संमुखोमतइतिश्लोकंकृत्वासंमुखत्वं
कृत्वापंथेकृतंतन्न तद्दृष्टिपरमेवनत्वन्यपरं अथस्थिरदशामा

ह ग्रहाणां दशापाकाः क्रमाद्दशाः स्थिरदशाख्याः चरस्थिरद्विस्वभावरा
शीनां क्रमेण सप्ताष्टनवाब्दा नियताः स्थिरदशायां भवंतीत्यर्थः तथा
१४ मेषस्य सप्त वृषस्याष्टौ मिथुने नव पुनः कर्के सप्त सिंहेष्टौ इत्यादिक्रमेण द्वा
दशराशिपर्यंतमब्दा ज्ञातव्याः एतद्दशारंभस्थानमाह बलादिरेषा
एषा दशा बलग्रहाश्रितराशिमारभ्य वर्त्तनीयेत्यर्थः अथ बलमधि
करोति अथ प्राणः अथानंतरं प्राणो बलमुच्यते कारकयोगः प्रथ
मो भानां भानां राशीनां माद्यं बलं कारकयोगो भवति साम्ये भूयसा
ग्रहयोगसाम्ये उभयत्र ग्रहयोगसत्त्वे सति भूयसा ग्रहयोगेन बलं भ
वति ग्रहयोगभूयस्त्वादिभिरपि साम्ये निर्णयकमाह ततस्तुंगा
दिः ततो भूयस्त्वानंतरं तुंगादिर्बलं स्यात् राशेस्तुंगस्वग्रहस्वामि
त्वग्रहस्य ग्रहयोगः प्राण इत्यर्थः अथ परराशीनां निसर्गबलमाह
निसर्गस्ततः ततः तुंगादिबलानंतरं निसर्गबलं ग्राह्यं चरात्स्थि

स्वस्वकारकसं
वंधः तथा चत
त्तद्राशेस्तत्तत्का
रकसंवंधः प्रथ
मं बलमित्यर्थः = ६

१४

राशौ शासमसत्वेपि =

एवंच अग्रहात्सग्रहोज्यायान् सग्रहेत्वधिकग्रहः आधिक्येपि समानत्वे तुंगादिर्वलवान् भवेत् तुंगा
दिवलसाम्ये दिततो नैसर्गिकोवली अभावना थिनाथस्य वलं ग्राह्यं विशेषतः तत्रसाम्येधिकांश
स्यवलंस्यात्प्रथमेव ले इति फलितोर्थः =

रं स्थिराद्द्विस्वभावं वली त्यर्थः तदुक्तं वृद्धैः अग्रहात्सग्रहोज्यायान्सग्रहे
त्वधिकग्रहः साम्ये चरास्थिरद्वंद्वाः क्रमात्स्युर्वलशालिन इति तदभाव
स्वामिन इत्यंभावः राशौ कारकयोगे तदभावे अभावे स्वामिनो राश्यधि
पते रित्यंभावः) ~~राशौ कारकयोगे तदभावे अभावे स्वामिनो राश्याधिपते~~
रित्यंभावः कारकयोगादिर्वलं यद्राशिनाथो वलवान्स राशिर्वलीति भावः
अग्राय तोत्र विशेषात् एकराशौ वहुग्रहेषु सत्सु तेषां राशि दारकवलसाम्ये
पि अत्रास्मिन् ग्रंथे अग्रायत्तो ग्रहो विशेषाद्वलीभवति अग्रमायत्तः गतः
अग्रायत एव अग्रायत्तः अधिकांश इति यावत् तथाच वहुग्रहेष्वे
कराशिस्थ ष्वधिकांशको वलवानिति प्रातिवेशिकः पुरुष पुरुषेजो
जे राशौ प्रातिवेशिकः पार्श्वराशिवर्ती द्वि द्वादशगतोपि ग्रहः स्वस्ववलक
र्त्ता स्यात् इति प्रथमः इति प्रोक्तप्रकारेण प्रथमः प्राग उक्त इत्यर्थः स्वामि
गुरुज्ञदृग्योगो द्वितीयः स्वामिगुरुयोगो वुधयोगश्चैकैकस्मो राशीनां

योगो १

विषमराशयः २।४।६।८।१०।१२ एषु पापदृग्योगे सति बलं भवति यदि शुभग्रहास्तुंगादिस्थास्तेषां दृग्योगो वि
षमराशिषु बलं भवति अन्यथा न भवति द्वितीयं बलं स्वामिगुरुज्ञदृग्योग इत्युपरितं समराशिषु योजनी
यमिति भावः ॥

बलं भवति स्वामिदृष्टिर्गुरुदृष्टिर्बुधदृष्टिश्चैकैकशो द्वादशराशीनां बलं स्या
२५ त् एवं षड्बलानि द्वितीयः प्राण इत्यभिधीयते द्वितीयं भावबलं इत्यग्रिम
15 सूत्रे द्वितीयं बलं ग्राह्यमिति स्पष्टीकृतं स्वामिनस्तृतीयः स्वामिनो राश्य
धिपतेर्बलसमानः प्राणस्तृतीयप्राण इत्यर्थः अथ स्वामिबलाबलं दर्शय
ति स्यात्स्वामिनः कंटकादिष्वपारदौर्बल्यं स्यादात्मकाश्कात्कंटकादिषु
केंद्रपणफरापोक्लिमेषु स्वामिनोऽपारदौर्बल्यं भवति केंद्रे शून्यं पणफरे
एकं आपोक्लिमे द्विगुणं दौर्बल्यं भवति चतुर्थतः पुरुषे चतुर्थतः पाप
दृग्योग इत्यादिना बलसमानं चतुर्थबलादपि पुरुषे विषमराशौ बलं भवती
त्यर्थः यत्तु चतुर्थतः प्रथमांतात्तसिः स्यात् पुरुषश्चतुर्थप्राण इति केश्चि २५
दुक्तं तदयुक्तं एवं चेन्मुनेस्तात्पर्यं तर्हि चतुर्थः पुरुष इत्येव ब्रूयात् चतुर्थं
बलमिति शंका निराक्रियते चत्वार इत्यग्रे वक्ष्यति नहु तद्बलमप्यत्रैव
कुतो नोक्तमिति चेन्न तद्बलस्य सांप्रतमनुपयोगादुपयोगि बलमुक्त्वा कां

निर्याणशूलदशासंज्ञकदशायामपि
लग्नसप्तमान्यतरशूलदशायां नि
र्याणं विचारणीयं =

जन्मलग्नसप्तमयोर्मध्ये यः अन्यतरः तस्य त्रिकोणराशि
दशायां त्रिकोणराशीनां मध्येऽन्यतमराशिदशा =३

अनदशाः प्रदर्शयिष्यतीति अथ निर्याणशूलदशामाह पितृलाभप्र
थमप्राण्यादिशूलदशा निर्याणे लग्नसप्तमयोर्यः प्रथमबलवान् तदा
दिगणनया प्रवृत्तदशाया यदा लग्नसप्तमान्यतरत्रिकोण ५।९ राशिद
शा तदा निर्याणं भवतीत्यर्थः अत्र नवनवाद्या ग्राह्याः पुरुषे समाः सा
मान्यत इति सूत्रस्य व्याख्यत्वात् पितुर्निर्याणदशामाह पितृलाभपुत्रप्रा
ण्यादिः पितुः लग्नसप्तमयोर्यौ पुत्रराशी नवमराशी तयोर्मध्ये बलवान्
तमारभ्य क्रमेण प्रवृत्तितया दशया प्रोक्तरीत्या सशूलदशायां पितुर्निर्या
णं भवति मातुर्निर्याणदशामाह आरम्भादिर्मातुः लग्नात्सप्तमाद्वा बलिन
श्चतुर्थराशेः शूलदशायां मातुर्निर्याणं स्यात् कर्मादिर्भ्रातुः लग्नात्सप्तमा
द्वा बलिनस्तृतीयराशेः शूलदशायां भ्रातुर्निर्याणं मातादिर्भगिनीपुत्रयोः
मातृ आदिरिति पदच्छेदः लग्नात्सप्तमाद्वा बलिनः पंचमराशेः प्रवृत्तशूल
दशायां भगिनीपुत्रयोर्निर्याणं ज्यायादिर्ज्येष्ठस्य लग्नात्सप्तमाद्वा बलिनः

यद्वा रुद्रशूलांत
नि स्यादिषुवद्गुरु
स्थाने षु दशायस
दर्शनादिह च तद
र्शनाल्लग्नसप्तमा
न्यतरस्मात्त्रिको
णराशिस्थाश्चतुः ५।
९।प्रकारक्रमे
ण निर्याणशूलद
शा तन्मतः प्रवृत्ता
विज्ञेया
अथवा लग्नस
प्तमान्यतरस्माद्व
लवाति दशाक्रम
श्वरादिष्वनुक्ति
तमार्गे विशेषक
केंद्रादिक्रमतः
पुंस्त्रियोः प्राप्त्र
त्याभावेन नेयः
दशायां शूलत्व
विशेषणाच्च तस्मा
मेव दशायां त्रिको
णे निर्याणं =१

पुरुषे समाः सा
मान्यतः सार्वसुद
शास्यारंभः =४

कारकयोगदसा
दिना =२

प्रकारक्रमेण
निर्याणशूलद
शा तन्मतः प्रवृ
त्ता विज्ञेया अन्य
पर्यायेपि इदं
पाठ =

प्रवृत्तायां ततः =३

मंत्रीयां ततः

एकादशराशेः प्रवृत्तायां दशायां ततः शूलदशायां ज्येष्ठभ्रातुः निर्याणं पि
तृव्य पितृवर्गे लग्नात् सप्तमाद्बलिनो नवमराशेः प्रवृत्तायां दशायां
ततः शूलदशायां पितृवर्गस्य पितृव्यादेः निर्याणं स्यात् अथ ब्रह्मदशा
माह ब्रह्मादिं पुरुषे समा दासां ताः पुरुषे विषमे जन्मलग्ने सति ब्रह्मा
दि ब्रह्मग्रहाश्रितराशितो दशा प्रवर्त्तनीया समा दासां ताः कोर्थः स्वराशेः ष
ष्ठराशिस्वाम्यंतं समा दशा व्याख्याताः ननु दासांतपदेन षष्ठराशिस्वाम्यंतमि
त्यर्थः कथमिति चेच्छृणु षष्ठराशेः पतन वर्षानयने सर्वेषां संमतत्वाद्ध्रासस
स्युत्तरवर्षाभावाच्चायोग्यत्वात् स्वाम्यंत इत्यर्थः संपन्न इति चेत् दर्षानियत ब्रह्मा
दिगणना तदा पुरुषे ब्रह्मादि समादासां ता इति सत्त्वं पूर्णीतं स्यादित्युक्तं स्था
नव्याक्तिकरः तत्रस्थानव्याक्तिकरः सप्तमसंबंधोस्ति अयं भावः विषमे
लग्ने आदौ ब्रह्माश्रितराशिदशा ततः क्रमेणान्येषां समे लग्ने तु आदौ ब्र
ह्माश्रितसप्तमराशिदशा ततो व्युत्क्रमेणान्येषां राशीनां दशा विषमे ब्रह्मा
दि समे तु ब्रह्मसप्तमादि क्रमव्युत्क्रमभेदेन दशा आनेया इति फलितार्थः

सू वृं मं बु बृ शु श एते मूलत्रिकोणाः = २

अथ चतुर्थबलमाह पापदृग्योगः तुंगादिग्रहयोगः पापग्रहाणां दृष्टियोगश्चराशेर्बलं भवति तुंगमूलत्रिकोणस्वक्षातिमित्रराशिस्थित शुभग्रहयोगश्च बलं स्यादित्यर्थः यत्तु तुंगादीतियोग इति योगविभागं कृत्वा तुंगादिबलं ग्रहयोगबलं चेत्युक्तं पंथैस्तन्न पापदृग्योग इति सूत्रेण पापदृग्योगबलमुक्तमेव ग्रहयोग इति सूत्रेणैव तदर्थलाभात् पापदृगित्येव वक्तव्ये योगपदं व्यर्थं स्यात् तस्मात्पापग्रहाणां यत्रकुत्र स्थितानामपि योगे बलं शुभग्रहाणां तु तुंगादिस्थानामेव योगे बलं नत्वन्यत्रस्थानामिति भावः इति चत्वारः कारकयोगमित्यादिनात्रयः पूर्वोक्ताः एकोयमिति चत्वारः प्रमाण इत्यर्थः पूर्वोक्तं व्युत्क्रमभेदमाह पंचमेपदक्रमात्याकप्रत्युक्ते त्रिभिस्त्रिभिर्भैरसमं समं च पदानि चत्वारि भवंति चक्रे इति लग्नान्नवमे ओजपदांतर्गतराशिश्चेत् क्रमात् युग्मपदांतर्गतराशिश्चेत् व्युत्क्रमाद्दशा नेया पूर्वं चरदशावर्षनियनमात्रमुक्तं क्रमव्युत्क्रमभेदात्तु नोक्तस्तस्मा[illegible]दत्रोक्तं मानमेवात्र ग्राह्यमिति [illegible]

द्वितीयं भावबलं पापदृग्योगेत्यादि चतुर्थबलं च निधनादिफलादशायग्राह्यमिति फलितार्थः = ५

चरनवांशेग्रहनवांशराशिस्तत्समानीतचरनवांशाद्‌द्वितीयंभावबलं स्वाम्यादिदशाग्रा
ह्यफलादेशायेत्यर्थः =४

यामत्र शुभः केतुः पंचम इति सूत्रे दशारंभावधेरनुक्तत्वाल्लग्नेन चर
दशायां केतुः शुभः शुभग्रहफलद इति॥ ॥इति जैमिनिसूत्रव्या
ख्यायांसुबोधिन्यां द्वितीयाध्यायस्य तृतीयः पादः॥ ॥

द्वितीयंभावबलत्वत्तच्चरनवांशे चरराशेर्नवांशादशायां द्वितीयंभावब
लंस्वामिशुक्रज्ञग्रहयोगइतिफलादेशाययाह्यमित्यर्थः॥ ॥अथद्वार
बाह्यराशीनदर्शयिति दशाश्रयोद्वारं ततस्तावतिथंबाह्यं यस्मिन्काले
यस्यराशेर्या दशा चरस्थिरपर्याय तत्तद्दशाश्रयोराशिर्द्वारमित्युच्यते ए
नमेव पाकराशिरितिव्यवहरंति लग्नाद्यावत्संख्याकोद्वारराशिस्तस्मा
तावत्संख्याकोराशिर्बाह्यमितिनिगद्यते एनमेवभोगराशिंवदंति अ
त्रलग्नशब्देनजन्मकालेयद्राशिःततः प्रथमिकोदशासमारभ्यतेस
राशिर्ग्राह्यः लग्नं सप्तमोवाबलग्रहाद्याश्रितराशिर्वा यथायोग्यमा
द्यदशाश्रयराशिरेवपाकराशेरवधिर्नतुप्रसिद्धंलग्नं एवंचेन्नोच्य
ते तर्हिसएवभोगराशिश्च पर्यायेप्रथमेस्यादितिनलगति यत्रसप्तमा
जन्मकालेप्याद्यदशाश्रयराशेर्यावंत्संख्याकोद्वारराशिस्तस्मात्तावत्संख्याकोराशिर्बाह्यमुच्यते =६
[illegible] क्रमगणनया =१

१७

स्थिरनवांशाश्रा
स्तुप्रतिराशिनव
नववर्षाणीतिवे
दितव्यं यद्वाचर
राशेर्नवांशाद्
सामान्येचरस्थि
रलग्नकेद्विविधेपि
फलादेशायतद्
लग्नाद्यम =४

लग्नाच्चरती
तिव्युत्पत्यालग्न
होरा =१

दशाश्रयोद्वारमि
तिसूत्रार्थोतग्रतित
तत्राश्रयाश्रितदशा
नयनप्रकारतत्क
मादिमेदाः प्रथमेपा
गित्यादिभिस्तुभः
स्त्रैः वक्ष्यमाणश
चरैः जितेत्यादि
केनसंगृहीतावे
दित
व्याः =६

तत्रलग्नाश्रितराशितो वा दशाप्रवृत्तिस्तत्रयः पाकराशिः स भोगराशि

रिति न संभवति तदुक्तं वृद्धैः चरे स्तु(?) कृतमार्गः स्यात् षष्ठषष्ठादिकाः

स्थिरे उभये केंटकाद्यज्ञेयाः लग्नपंचमभाग्यतः चरस्थिरद्विस्वभावे

ष्वोजेषु पाकक्रमो मतः तेष्वेव विषयुग्मेषु ग्नाहं व्युत्क्रमतोऽखिलं

एवमुल्लिखितो राशिः पाकराशिरिति स्मृतः स एव भोगराशिश्च पर्यायेषु

थमे स्मृतः लग्नाद्यावतिथः पाकः पर्यायेयत्र गृह्यते तस्मात्तावतिथो भो

गः पर्यायेतत्र गृह्यतां तदिदं चरपर्याय स्थिरपर्याययोर्द्वयोः त्रिकोणाख्य

दशायां च पाककभोगप्रकल्पनामिति पर्याये दशायामित्यर्थः अथ द्वारवा

ह्ययोः फलमाह त्रिभिः सूत्रैः तयोः पापे वंधयोगादिः तयोः द्वारवाह्ययोः

पापग्रहे सति तद्दशायां वंधादिः स्यात् तदुक्तं वृद्धैः पाके भोगे च पापाढ्ये दे

हपीडा मनोव्यथेति स्वर्क्षस्य तस्मिन्नोपजीवस्य तस्मिन् द्वारे वाह्ये वा राशौ

पापाश्रयीभूतेऽस्य पापस्य परं तूपजीवस्य उपसमीपे जीवो यस्येति गुरुस

मीपवर्त्तिनः स्वर्क्षे स्थितो सत्यां वंधो न वंधादिरित्यर्थः पाकभोगाश्रितः

दशाप्रवृत्तिराशेस्तु द्वितीयादेर्दशायदा तावत्संख्यं च गणयेत् क्रमव्युत्क्रमभेदतः द्वितीयादिद्वारसंज्ञो राशिर्भवतितत्पु

नः वाह्यसंज्ञस्तावदेव तत्र तत्र विचार्यते । आरंभे तु द्वारवाह्यकल्पनानैव संभवा तदेव द्वारं वाह्यं च इति सर्वैक्त

द्वाहृत =

ओजपदेषु क्रमे णैव षष्ठादिरा

श्यागणनायैस्व र्णः = ८

द्वार राशिः = ५

जन्मनि प्रथम दशाप्रवृत्तौ = ६

युग्मपदेषु क कादित्रयेमक रादित्रयेचव्यु त्क्रमेण = ८

स्वयंपापेपाप युक्तेपापदृष्टेच = ८

पापोयदि स्वर्से गुरुयुक्तस्तर्हि स्त्रदोषो नेतियावत् भवतहयोगोक्तंसर्वम
१८ स्मिन् अस्मिन्द्वारे वाह्ये वा भस्वेटाभ्यां जातायेयोगास्तेषूक्तं सर्वं शुभा
18 शुभफलं वेदितव्यमित्यर्थः अथ केंद्रदशारंभस्थानभेदं दर्शयति पितृला
भप्राप्तिनोयं लग्नसप्तमयोर्बलवान् राशिस्तस्मादयं वस्समात् दशाक्रमो
ज्ञेयः तं राशिमारभ्य दशा प्रवर्तनीयेतियावत् तदुक्तं हृद्वे: बलिनःशु
क्रे शशिनोः केंद्राद्यास्तु दशां नयेत् पुरुषश्चेत्ततो नेयास्त्री चेद्दूर्पलत्तोन
येत् अयमर्थः पुरुषो जातकवान् चेल्लग्नसप्तमयोर्बलवतो दशां नेया
स्त्री जातकवती चेद् बलवत्सप्तमाद् दशां नेयेति केंद्रदशाक्रमभेदानाहमन्त्र
त्रैः प्रथमेप्राक्प्रत्युक्तं प्रथमे चरराशौ लग्ने सप्तमे वा सति बलवल्लग्न
सप्तमान्यतरराशेरनुक्रितं मार्गेण दशाक्रमः स्यात् तत्राप्योजयुग्मपद १८
भेदात् प्राक्प्रत्युक्तं क्रमोत्क्रमत्वं ओजपदे प्रथम द्वितीयादि द्वादशादि युग्मपदे प्रथम
शात्याज्ज्ञेयमित्यर्थः यत्तु सामान्यपरिभाषातः प्राक्प्रत्युक्तं प्रथमेवात्रेत्सं
प्राक्प्रत्युक्तपदमनुज्झितक्रमपदमितिपंचधेकृत्तं तन्न सामान्यपरिभा

द्वादशराशीनां युः दशाक्र पंचमेपदक्रमादिति =१ द्वितीयपंचमेपदादिति =१
मः तेन =८

अनुजितक्रमलाभात् =३

षायादशावद्वानयनपरत्वात् नचैवंमस्यनुजितक्रमरूपोर्थोनिस्यादि
तिवाच्यं स्थिरद्वंद्वयोः षष्ठकेंद्रादिक्रमयोर्वक्ष्यमाणत्वादत्रांतेपादेव
तल्लाभात् अन्यथालाघवात्प्रथमेक्रमतइत्येवब्रूयात् अत्रत्यंपंचमेष
ट्क्रमादितिसूत्रोक्तंचप्राक्प्रत्युक्तपदंदशाक्रमेसामान्यपरिभाषा अत्रत्य=४
ऽध्यायोलिंगं द्वितीयेराशितः द्वितीयेस्थिरेराशौलग्नेसप्तमेवासति
वलवल्लग्नसप्तमान्यतमराशेः ओजयुग्मपदभेदात्क्रमोत्क्रमाभ्यां
राशितः षट्क्रमेणदशाप्रवृत्तिर्द्वितीयेस्पष्टः तदुक्तंवृद्धैः क्रमाद्
षट्त्रिकेचव्युत्क्रमात्कुंभसिंहयोः षष्ठषष्ठादिकाग्राह्याइत्येताव
द्विनिश्चतेइति पथकक्रमेणतृतीयेचतुष्कयादि तृतीयेद्विस्वभा
वराशौलग्नेसप्तमेवासतिवलवल्लग्नसप्तमान्यतमराशेश्चतुष्कया
दिकेंद्रादितः पथकक्रमेणलग्नपंचमनवमादितः ओजयुग्म

सामान्यपरिभाषानप्रवर्ततेइतिभावः =५

कुंभे कारकांशे तडागादयः तडागवापीकूपादिकर्त्ता भवति उच्चे धर्मनित्यता कैवल्यं च मी
=नद ने कारकांशे धर्मनित्यत्वं कैवल्यं मुक्तिश्च भवति कारकस्यांशादिस्तुलेः फलं दृढं संग्रहितं शुभ
राशौ शुभांशे वा कारके धर्मवान्भवेत् तद्वशात्केंद्रेषु शुभे राजानुग्रेप्रजायते कारके शुभराश्यं
शे लग्नांशस्थे शुभग्रहे उपग्रहस्य पार्श्वाते स्वोच्चस्वर्क्षशुभदृग्गे पापदृग्योगरहिते कैवल्यं त
स्यानिर्दिशेत् मिश्रे मिश्रं विजानीयाद्विपरीते विपर्ययः तद्वशात्केंद्रेषु कारकांश[redacted] श्रितां
शकुंडल्यां केंद्रेषु इत्यर्थः पार्श्वात्ये ग्रंत्यग्रहे इत्यर्थः मिश्रे पापशुभदृग्योगे मिश्रं स्वर्गवासः ग्रहे
विपरीते पापमात्रदृग्योगसाहित्ये विपर्ययः न मुक्तिर्न स्वर्गवासः इति "चंद्रभृग्वार्कवर्गस्थे कार
कारकग्रहे=२ के पारवौरिकः वृषतोत्यं शकगते तस्मिन्वालिजवान्भवेत् मेषसिंहांशके तस्मिन्भूयान्मूषि
त=२ कदंशनं कारके कार्मुकांशस्थे वाहनात्पतनं भवेत् अथ कारकांशेग्रहस्थित्यादिना फलान्युपदि
शति तत्रचरवौ राजकार्यपरः कारकांशस्थे सति राजकार्यतत्परो भवति दृष्टेंदुशुक्रयोर्भोगी

विद्याजीवी च कारकेंशे शुक्रेंदुमुक्तयोः सतोर्भोगी विद्याजीवी च स्यात् धातुवादी कौंतायुधोव
ह्निजीवी च भौमे कारकांशे भौमे सति धातुवादी रसायने विद्यावान् कौंतः वर्छीति भाषयाद्वत्ति तैक्षीर
१० ह्रायुधः वह्निकृतजीवनवांश्च स्यात् वाणिजस्तंतुवायाः शिल्पिनो व्यवहारविदश्च सौम्ये कार
10 कांशे बुधे सति वाणिज्यप्रभृतयो भवंति कर्मज्ञाननिष्ठा वेदविदश्च जीवे कारकांशे गुरौ सति क
र्मनिष्ठादयो भवंति राजकीयाः कामिनः शतेंद्रियाश्च शुक्रे कारकांशे शुक्रे सति राजाधिका
रवंतः बहुस्त्रीस्पृहालवः शतवर्षजीविनश्च भवंति शतं शतवर्षं इंद्रियाणि येषामिति स्वा
मिनः पंथास्तु शतानि इंद्रियाणि येषामिति वदंति तन्न इंद्रियाणां शतत्वादर्शनात् प्रसिद्धकर्मा
जीवः शनौ कारकांशे शनौ सति लोकप्रसिद्धकर्मणा जीवतीत्यर्थः धातुष्काश्चोराश्च जांगलि
का लोहयंत्रिणश्च राहौ कारकांशे राहौ सति धातुष्काश्चोराश्च स्युः किंवा जांगलिका लोहयंत्रि विषवैद्यो जांगलिकः १० समरः
णश्च स्युः वैकल्पिकमिदं फलद्वयं कथमवगतमिति चेत् मध्ये चकारोपादानादेव अन्यस्य
त्वस्वत एव च कारउपात्तः अत्र मध्ये किमर्थमिति गजव्यवहारिणश्चोराश्च केतौ कारकांशे
केतौ फलमिदं रविराहुभ्यां सर्पनिधनं कारकांशे रविराहुस्थित्या सर्पान्मृतिर्भवति शुभदृष्टे
स्तन्निवृत्तिः शुभग्रहावलोकिते रविराहुयोगे कारकांशे सर्पान्मृतिर्न स्यात् शुभमात्रसंबंधा

तकरस्पस्वर२३जयगु८भय२४नदप२८तनुदखनि२नाड्यो भास्करादिवारेषु दिनमानघटी गुणिता नाग२८हृता गुलिकनाडिकाः स्पष्टाः।
स्फुटगुलिकनाडिकामिस्तत्काला र्कात्सायननैनापि लग्नवदानेतव्यो राश्यंशकलादिरूपको गुलिक इति =
ज्यागलिकः कारकांशगयो रविराह्वोः शुभमात्रयोगे सति ज्यागलिको विषवेधो भवेत् मात्रशब्दे
न पापग्रहनिवृत्तिः कुजमात्रदृष्टे गृहदाहकः अग्निदो वा कारकांशगयोः रविराह्वोः कुजमा
त्रदृष्टौ सत्यां गृहदाहकोग्निदो भवति शुक्रदृष्टेन दाहः कारकांशगत रविराह्वोः शुक्रदृष्टौ स
त्यां गृहदाहो न स्यात् किंतु अग्निदानमात्रं करोति गुरुदृष्टे स्त्वासमीपगृहात् कारकांशगयोः
रविराह्वोर्गुरुदृष्टौ सत्यां शुक्रदृष्टौ वसत्यां आसमीपगृहात् समीपगृहपर्यंतं दाहः स्यात् नस्व
गृहमात्रस्य सगुलिके विषदो विषहतो वा कारकांशे गुलिकसहिते सति परस्मै विषदाता
वा स्वयं विषेण हतो वा स्यात् गुलिकानयनप्रकारस्तु वृद्धकेरलेः रविवारादिशन्यंतं गुलि
कादि निरूप्यते दिवसानष्टधा कृत्वा वारेशाद्गणये त्क्रमात् अष्टमेशो निरीशः स्याच्छन्यंशो
गुलिकः स्मृतः रात्रौ रष्टधा भक्त्वा वारेशात्पंचमादितः गणयेदष्टमः षंडो निःपतिः परिकी
र्तितः शन्यंशो गुलिकः प्रोक्तो गुर्वंशो यमघंटकः भौमांशो मृत्युमादिष्टोरव्यंशे कालसंज्ञकः सौ
म्यांशोर्द्धप्रहरकः स्पष्टकर्मस्वदेशतः रव्यादिसप्तवारेषु दिनमष्टधा विभज्य तत्तद्वारेशं प्रथम दिनं दिनमानं = २
षंडाभिधं कृत्वाग्निमषंडेषु तत्तद्वारेशादग्रिमग्रहक्रमेण ईशत्वेन जानीयादष्टमः खंडः
कटपयादिवर्णैः निरीशः एवं च सप्तसु वारेषु शन्यंशो गुलिकनामा तथा च भुक्तवार रविवारे सप्तमः सोमे षष्ठः
संख्या गायोः च तद्धराद्यमानं दिनमानं हृतं प्रमाणपरिहीनं अष्टभिः प्रहरे भागो लब्धस्तत्कालिको गुलिकः अस्यार्थः इष्टवारसंख्यांतपर्यंतं
गननांकत्वा ततसंख्यया दिनमानं गुणितं रविवारादि वारसंख्या हीनं अष्टभक्तं लब्धं गुलिकघटिकादि =

कुरु गुलिकनाडिकाभिमयेन लग्नकालिकसूर्यमानीय तत्सायनं कृत्वा लग्नरीत्या कल्पनीयं तत्र इष्टघटीस्थाने
गुलिकनाडिका एव योज्या इति गुलिकस्पष्टीकरणं ॥

भौमे पंचमः बुधे चतुर्थः गुरौ तृतीयः शुक्रे द्वितीयः शनौ प्रथमः खंडो गुलिको भवति सप्तसु
पिवारेषु रात्रिमानमष्टधा विभज्य तत्तद्वारे शात्पंचमाद्याः खंडाभिधा ज्ञेया रात्रावप्यष्टमः खं
१९ डानिरीशः एवं च रविरात्रौ तृतीयः खंडः सोमे द्वितीयः भौमे प्रथमः बुधे सप्तमः गुरौ षष्ठः
शुक्रे पंचमः शनौ चतुर्थः खंडो गुलिको भवति एवं सर्वेषु वारेषु दिने रात्रौ च गुरुः खंडो यम
॥ घंटनामा बुधखंडोऽर्द्धप्रहराख्यः रविखंडः कालसंज्ञः भौमांशः मृत्युनामेति ज्ञेयं स्पष्टकमिद
ति गुलिकादीनां स्पष्टीकरणं तु स्वस्वदेशलग्नप्रमाणानुसारेण तत्तत्खंडकालांतलग्नानि स्प
ष्टानि कृत्वा गुलिकादिस्पष्टलग्ने कस्यांशोस्ति स एव कारकोंशश्चेत्तत्र गुलिको जात इति विवे
चनीयं तथा च संग्रहे तथा च रविवारादौ दिने गुलिकसंस्थितिः सप्तसु शार्वे द[illegible] त्रिद्वि
कु खंडेषु हि क्रमात् रात्रौ त्रिद्विकुसप्ततुपंचतुर्येषु च स्थितिरिति चंद्रदृष्टश्चोरापहृतधन
श्चोरो वा स गुलिके कारकांशे चंद्रदृष्टो सत्यां चौरैर्हृतधनः स्वयमेव चोरो वा स्यात् बुधमा
१९ त्रदृष्टे हृतद्वीजः स गुलिके कारकांशे स्वग्रहादृष्टे बुधमात्रदृष्टे वृहद्बषणो स्वग्रहाऽदृष्टे वृ
षणो इति बुधदृष्टे स्थूलवृषणो भवति तत्र केतौ पापदृष्टे कर्णछेदः कर्णरोगो वा स गुलिके इ
तिपदं निवृत्तं तत्र कारकांशेन वांशा कुंडल्यां केतौ सति पापग्रहदृष्टे सति कर्णच्छेदः कर्णरोगो वा

भवेदिति शुक्रदृष्टेदीक्षितः सकेतौकारकांशेशुक्रदृष्टेसतिकयाचिद्युक्त्यादीक्षितःस्यात्
बुधशनिदृष्टेनिर्वीर्यः सकेतौकारकांशेबुधशनिदृष्टेनपुंसकः स्यात् बुधशुक्रदृष्टेपौनःपुनि
कोदासीपुत्रोवा सकेतौकारकांशेबुधशुक्रदृष्टेपुनःपुनरुक्तवचनवक्तादासीपुत्रोवास्यात्
शनिदृष्टेतपस्वीप्रेष्योवा सकेतौकारकांशेखेटांतरेणदृष्टेपिशनिदृष्टेतपस्वीभृत्योवास्यात्
शनिमात्रदृष्टेसंन्यासाभासः सकेतौकारकांशेखेटांतरेणादृष्टेशनिनैवदृष्टेसंन्यासाभा
सः नसंन्यासीत्यर्थः केतावितिनिवृत्तं तत्ररविशुक्रदृष्टेराजप्रेष्यः कारकांशेकेवले
रविशुक्राभ्यांदृष्टेराजभृत्योभवति॥ ॥अथकारकांशाद्दशमांशमवलंब्यविचारयति रि
ष्फेबुधेबुधदृष्टेवामंदवत् कारकांशाद्दशमेबुधेसतिबुधेदृष्टेवासतिमंदवत्शनिवत्प्रसि
द्धकर्माजीवः शनावितिसूत्रोपात्तंफलंभवति शुभदृष्टेस्थैर्यः कारकांशाद्दशमेबुधेत
च्छुभग्रहदृष्टेस्थिरोभवति नवंचलः बुधेतरशुभदृष्टत्वंकथंज्ञातमितिचेत् बुधदृष्टफ
लस्योक्तत्वादेव रवौगुरुमात्रदृष्टेगोपालः कारकांशाद्दशमेरवौसतिखेटांतरादृष्टेगुरुमा
त्रदृष्टेगोरक्षकोभवति कारकांशाच्चतुर्थफलमाह दारेचंद्रशुक्रदृग्योगात्प्रासादः का
रकांशाच्चतुर्थेचंद्रशुक्रदृग्योगाभ्यांप्रासादवान्भवति उच्चग्रहेपि कारकांशाच्चतुर्थे

स्थिते ऽष्टराशिगते ग्रहे पिपासार्त्वान्भवति राहुशनिभ्यांशिलागृहं कारकांशाच्चतुर्थस्थितरा
१२ हुशनिभ्यांशिलानिर्मितगृहंभवति कुजकेतुभ्यामैष्टकं गुरुणादारवं तार्णं रविणा इदं सूत्र
12 त्रयं राहुशनिभ्यामितिसूत्रेणैव केतुनाख्यातं॥ ॥अथ कारकांशान्नवमांशफलमाह स
मेशुभदृग्योगाद्धर्मनित्यः सत्यवादी गुरुभक्तश्च कारकांशान्नवमेशुभदृष्टियोगाभ्यांधर्म
निरतादिवान्भवति अन्यथापापैः नवमेपापदृष्टियोगाभ्यांधर्मनित्यत्वादिरहितोभवति श
निराहुभ्यांगुरुद्रोहः गुरुरविभ्यांगुरावविश्वासः नवमेगुरुरविदृग्योगाभ्यांगुरावविश्वासो
भवति तत्रभृगुअंगारकवर्गेपारदारिकः कारकांशान्नवमेशुक्रभौमान्यतरषड्वर्गेसतिपर
स्त्रीसक्तः स्यात् दृग्योगाभ्यामधिकाभ्यामामरणं नवमेशुक्रभौमान्यतरषड्वर्गेसति षड्व
र्गापेक्षयाऽधिकाभ्यांशुक्रभौमदृष्टियोगाभ्यांमरणपर्यंतपारदारिकोभवति केतुनाप्रतिबं
धः कारकांशान्नवमेकेतोर्दृष्टियोगाभ्यांप्रतिबंधः आमरणपारदारिकत्वस्यनिवृत्तिर्भवति १२
गुरुणास्त्रैणः नवमस्थितेननवमदृष्ट्यावागुरुणास्त्रीलोलः राहुणार्थनिवृत्तिः नवमस्थेन
नवमदृष्ट्यावाराहुणापरस्त्रीसंगनिमित्तंद्रव्यनाशः स्यात्॥ ॥अथ कारकांशात्सप्तमफल
माह लाभेवंदृग्गुरुभ्यांसुंदरी अत्रदृग्पदंनिवृत्तं नवमप्रकरणस्यसमाप्तत्वात् कारकांशात्स

स्थिता २

प्तमे चंद्रशुक्रौ यदि स्थितौ स्त्री सुंदरी भवति राहुणा विधवा सप्तमे राहुयोगे विधवा स्त्री गृहे भव
ति शनिना वयोधिका रोगिणी तपस्विनी वा कुजे विकलांगी अलक्षणांगी त्यर्थः रविणा स्व
कुले गुप्ता च सप्तमे रवियोगे स्वकुले भर्तृकुले गुप्ता रक्षिता स्यात् रामरणं नतु स्वातंत्र्येण यतस्त
तोऽटनशीला चकारादिकलांगी च बुधेन कलावती गीतवाद्यादिषु कुशला चापे चंद्रेनावृते दे
शे कारकांशाच्चतुर्थे चंद्रे सति हर्वै त्रियोगे पुंस सुत्र नाव्यादि ते देशे प्रोक्ता स्त्री प्रथमसंगः इत्य
र्थः कारकांशात्सप्तमे धनुषि चंद्रे इति वार्थः॥ ॥कारकांशात्तृतीये फलमाह क्रूरैर्विपापे
शूरः कारकांशात्तृतीये पापे सति शूरः स्यात् शुभे कातरः तृतीये शुभे कातरः॥ ॥तृतीय
षष्ठयोः फलमाह नतुचित्तयोः पापे कर्षुकः कारकांशात्तृतीयषष्ठयोः द्वयोरपि पापसत्वे कृषी
वलः स्यात् सप्तमे गुरौ विशेषेण सप्तमे गुरौ विशेषेण नवमे गुरौ विशेषेण कृषीवलः स्यात्॥ ॥
अथ कारकांशाद्द्वादशे फलमाह उच्चे शुभे शुभलोकः द्वादशे शुभे शुभलोकप्राप्तिः केतौ कैवल्यं कारकांशलग्ने
कारकांशे शुभे सति मुक्तिरित्यर्थः अथवा कारकांशाद्द्वादशे केतौ सति मुक्तिरिति वार्थः क्रियचा चा=
पयोर्विशेषेण कारकांशे मेषे धनुषि वा तत्र शुभे सति विशेषेण मुक्तिः सायुज्यमुक्तिरित्यर्थः अथ
वा मेषे धनुषि वा द्वादशे केतौ सति सायुज्यमुक्तिरिति वस्तुतस्तु शुभापेक्षया केतोः सायुज्यमुक्तिहे
तुत्वायोग्यत्वात्प्रथमवीथ्येव समुचितेति बोध्यं नचैवं कारणकेतोः शुभत्वमुक्तं केतावपि शुभत्वं

।स्यात्तर्हि चरदशायामत्रशुभः केतुरितिवक्ष्यमाणस्य चाब्रदशायामेवशुभः केतुरन्यत्रनेत्यर्थो
वगम्यत इति पापैरन्यथा कारकांशाद्द्वादशेकारकांशेचपापयोगेनशुभलोकोनचमुक्तिरित्यर्थः
१२ रविकेतुभ्यांशिवेभक्तिः अत्रामात्यदासेच्चैवमितिपर्यंतंकेताविति पदमनुवर्त्तते कारकांशेरविके
13 तुभ्यांमिलिताभ्यांस्थिताभ्यांशिवेभक्तिर्भवतीति अग्रेप्येवमेवयोजना चंद्रेणगौर्य्यांशुक्रेणलक्ष्म्यां
कुजेनस्कंदे बुधशनिभ्यांविष्णौ गुरुणासांबशिवे राहुणातामस्यांदुर्गायांच तामस्यांभूतादिदेव
तायांचेति केतुनागणेशेस्कंदेच पापर्क्षेमंदेक्षुद्रदेवतासु कारकांशेपापराशौशनौसतिकर्म
पिशाच्यादिषुभक्तिः शुक्रेच कारकांशेपापराशौशुक्रेतथैव अमात्यदासेच्चैवं॥ ॥आत्म
कारकमहान्नंताशो योग्रहः अमात्यस्तस्माद्यो दासो रव्यादिगणनयाषष्ठोग्रहस्तस्मिन्पाप
र्क्षेकारकांशेसतिक्षुद्रदेवताभक्तिरित्यर्थः पंथास्तु अयमर्थः स्वसंमतश्चेतापर्क्षेमंदशु १२
कामात्यदासेषु क्षुद्रदेवतास्विति सूत्रं प्रणीतं स्यादितिवदंति तन्न एवंचेन्मंदशुक्रामात्यदासेषु
मिलितेषु पापर्क्षेसत्सु क्षुद्रदेवताभक्तिरित्यर्थः स्यात् भवतितु एतेषामन्यतरस्यापि पापर्क्षेस्थितस्य क्षु
द्रदेवताभक्तिस्तस्माद्योगविभाग एवोचितइति त्रिकोणेपापद्वयेमांत्रिकः कारकांशात्पंचमन

वमयोः पापदृष्टे सति मांत्रिकः मंत्रवेत्ता भवति पापदृष्टे निग्राहकः शुभदृष्टेरनुग्राहकः त्रि
कोणे सपापे शुभदृष्टेऽनुग्राहकः लोकेषु अनुग्रहकर्त्ता स्यात् शुक्रेंदौ शुक्रदृष्टे रसवादी कार
कांशे चंद्रे शुक्रदृष्टे सति रसवादी भवति बुधदृष्टे भिषक् शुक्रेंदौ बुधदृष्टे सति वैद्यो भवति
चापे चंद्रे शुक्रदृष्टे पांडुश्चित्री कारकांशाच्चतुर्थे चंद्रे शुक्रदृष्टे सति श्वेतकुष्ठी भवति कुजदृष्टे
महारोगः चापगे चंद्रे कुजदृष्टे महारोगः कुष्ठी भवति केतुदृष्टे नीलकुष्ठं अर्थः प्राग्वत् तत्र
मस्तो वा कुजराहुभ्यां क्षयः कारकांशाच्चतुर्थे पंचमे वा यथायोगं कुजराहू चेत्तस्तर्हि क्षयरोगो
भवति चंद्रदृष्टौ निश्चयेन उक्तस्थानगयोः कुजराह्वोः चंद्रदृष्टौ सत्यां निश्चयेन क्षयरोगः चंद्रदृ
ष्ट्यभावे क्षयः स्वल्पः चंद्रदृष्टौ प्रबल इति भावः कुजेन पिटकादिः तत्र मस्तो वा स्थितेन कुजेन पि
टकादिर्भवति केतुना ग्रहणी जलरोगो वा तत्र मस्तो वा केतुश्चेत्संग्रहणी जलोदराद्या रोगा भवं
ति राहुगुलिकाभ्यां क्षुद्रविषभयानि तत्र मस्तो वा राहुगुलिको यदि तर्हि मूषिकादिविषभयानि भ
वंति तत्र शनौ धानुष्कः मस्ता विति निर्दृत्तं कारकांशाच्चतुर्थे शनौ धनुर्विनियुक्तः केतुना घटि
कायंत्री तत्र केतुश्चेत् घटिकायंत्री भवति बुधेन परमहंसो लगुडी वा तत्र बुधे सति परमहंसो
लगुडी वा अत्र सर्वत्रापि तत्रेति परमन्वेति राहुणा लोहयंत्री रविणा खड्गी कुजेन कुंती तत्र स्थि

रु

तैरक्षादिभिः तत्फलानि भवंति मातापित्रोश्चंद्र गुरुभ्यां ग्रंथकर्त्तृ कारकांशे तत्पंचमांशे वा यथायो
गं चंद्रगुरू चेद्ग्रंथकर्त्ता भवति शुक्रेण किंचिद्दूनः कारकांशे तत्पंचमे वा चंद्रशुक्राभ्यां किंचिद्दूनं ग्रं
१४ थकर्त्तृत्वं स्यात् ननु अयमर्थस्त्वया कथं लब्ध इति चेत् केवलशुक्रेण ग्रं फलस्य वक्तव्यत्वात्
14 न च ग्रंथकर्त्तृत्वे किंचिद्दूनं काव्यादित्वं च भवति इति वाच्यं एवं चेत् शुक्रेण किंचिद्दूनं ग्रंथकर्त्तृत्वं
कविर्वाग्मी काव्यज्ञश्चेति सूत्रं प्रणीतं स्यात् तस्मादयमेवार्थः सूत्रसंमतः न च समासांत पतित प
दानां भ्रमकारणानुवृत्तेरनौचित्यमिति वाच्यं अस्मिन्ग्रंथे त्वियं रीतिरस्त्येवेति बुधेन ततोपि का
रकांशे कारकांशे तत्पंचमे वा चंद्रबुधाभ्यां शुक्रयोगापेक्षयापि न्यूनग्रंथकर्त्तृत्वं स्यात् शुक्रेण
कारकांशे तत्पं चमे वा = ५ कविर्वाग्मी काव्यज्ञश्च मातापित्रोरेकत्र शुक्रयोगे काव्यादिः स्यात् गुरुणा सर्वविद्ग्रंथिकश्च
अर्थः सर्ववित् न वाग्मी वक्तृत्वं नेत्यर्थः पुनरपि गुरोरेव फलमाह विशिष्य वैयाकरणो वेद १४
कारकांशे तत्पं चमे वा = ३ वेदांगवित् स्पष्टं सभाजडः शनिना उक्तस्थानगेन मंदे न सभाजाड्यं बुधेन मीमांसकः स्पष्टः
कुजेन नैयायिकः स्पष्टः चंद्रेण सांख्ययोगज्ञः साहित्यज्ञो गायकश्च स्पष्टं रविणा वेदांतज्ञो
गीतज्ञश्च केतुना गणितज्ञश्च सूत्रे स्पष्टे गुरुसंबंधेन संप्रदायसिद्धिः रवेः क्रियोगे गुरुदृष्टिः शुक्र

षड्वर्गसंबंधे सति तच्छास्त्रसंप्रदायज्ञो भवति भाग्ये चैवं कारकांशाद्द्वितीयेपि चंद्रगुर्वादिसद्वेक्षि
योगेन ग्रंथकर्तृत्वादि पूर्वोक्तं फलं स्यादित्यर्थः सप्तावं केमित्येके कारकांशात्तृतीयेपि पूर्वोक्तग्र
हयोगेन ग्रंथकर्तृत्वादिफलमस्यामित्येके भाग्ये केतौ पापदृष्टे स्तब्धवाक् द्वितीये केतौ पापदृष्टे स
ति स्तब्धवाक् किंचित्संलग्नवचनः किं वा प्रत्युत्तरदाने झटित्यसमर्थो वा तोतलिकः स्यात् स्वा[illegible]पि
त्पदाद्भाग्यरोगयोः पापसाम्ये केमद्रुमः स्वीयजन्मलग्नाज्जन्मलग्नारूढाद्वा द्वितीयाष्टमयोः रा
श्योः केवलौ पापौ स्तः सद्ग्रहत्वेपि शुभपापान्यतरैकग्रहत्वेन द्विग्रहत्वादिना समसंख्यौ चेत्
तदा केमद्रुमयोगो भवति ननु स्वशब्देन कारकांशबोधः कथं न उच्यते स्वशब्दात्कारकांशबो
धश्चेत् पित्पदाद्दिवाकारेव तल्लाभे पुनरुपादानं व्यर्थं स्यात् स्वशब्दाभावेपि त्पदात्कार
कांशारूढादयमर्थः स्यात् अपि चेतस्तु जन्मलग्नाल्लग्नारूढाद्वेति स्वशब्देन तु स्वीयलग्ना
रूढाद्वेत्यर्थो भवतीति अयमेवार्थः परंपराश्रुतत्वात्प्राचीनैरुक्तः आरूढाज्जन्मलग्नाद्वा
पापौ स्त्री हानि गौ यदि केवलौ सद्ग्रहत्वेपि समसंख्यौ शुभाशुभौ चंद्रदृष्टौ विशेषेण योगः
केमद्रुमो मत इति यत्तु कारकलग्नारूढेभ्य इति स्वामिभिरुक्तं तद्वृद्धसंमतं नेति चंद्रदृष्टौ
विशेषेण प्रोक्तयोगे सति द्वितीयाष्टमयोश्चंद्रदृष्टौ सत्यां विशेषेण केमद्रुमो दरिद्रयोगो
स्वीयजन्मलग्नाज्जन्मलग्नारूढाद्वा द्वितीयाष्टमयोः ग्रहसाम्ये द्वितीये एकश्चेदष्टमेप्येकः तत्र द्वौ चेदन्यत्रापि द्वौ तत्र ग्रहो
नास्ति चेदन्यत्रापि न ग्रह इति प्रकारे[illegible] केमद्रुमयोगः

४ सर्वेषां राशीनां फलानि पाके ग्रहाणां दशाकालेषु भवंति २३

भवति ननु सर्वोक्तफलानि किं सर्वदा भवंति आहोस्वित्कालविशेषे इत्यत्राह सर्वेषां चैवं
२५ पाके सर्वेषां राशीनां पाके दशायां एवं सर्वोक्तानि फलानि भवंति अथ सर्वेषां राशीनां पाके
15 च दशारंभकालेपि एवं सर्वोक्तकेमद्रुमयोगविचारः कार्यः केमद्रुमे सति तद्दशायां दारि
द्र्यं स्यादिति ॥ ॥ इति जैमिनिसूत्रव्याख्यायां प्रथमाध्यायस्य द्वितीयः पादः ॥ ॥
॥ ॥ ॥ ॥ अथारूढकुंडली ग्रहाणां बलं व्याफलानि वक्तुं पदम
धिकरोति अथ पदं अथैतदनंतरं यावदीशाश्रयं पदमस्त्राणामिति सूत्रेनोक्तितमारू
ढापरपर्यायं पदमधिक्रियते अथैकादशस्थानमाश्रित्य फलमाह व्यये सग्रहे ग्रहदृ
ष्टेभिमतः लग्नपदादेकादशे सग्रहे ग्रहांतरदृष्टे सति लक्ष्मीवंतो भवंति शुभैर्न्या[illegible]यात
लाभः पापैरमार्गेण एकादशस्थाने ग्रहाश्चेदेकादशस्थाने द्रष्टारश्च तत्र मार्गेण एतास्वि
रुद्धमार्गेण लाभः मिश्रैर्मिश्रो लाभ इति ज्ञेयं उच्चादिभिर्विशेषात् उच्चस्वगृहादिस्थग्रहयो २५
गादिना विशेषप्राप्तिः उच्चादिगुणवत्त्वां शुभपापाभ्यां न्यायाच्च विशेषतो लाभ इत्यर्थः वृद्धैर
प्युक्तं आरूढाल्लाभभवने ग्रहः पश्यंस्तु नव्ययं यस्य जन्मनि सो विख्यातः प्रबलो धनवानपि दु
ष्टग्रहाणां बाहुल्ये तदा इष्टं हि तु गगे सार्गले वापि तत्रापि वक्रगलिसमागमे शुभग्रहार्गलै

दशा पा ३

रविराहुभृक्कैरेकादशेराजद्वारालाभः तत्रचंद्रदृष्टौ निश्चयेन बुधे ११ ज्ञातिनिमित्तादिभिर्ला
भः गुरौ ११ करव्याजेन लाभः कुजशनिभ्यां ११ भ्रात्‌ मुखाल्लाभः = ८

तत्र तत्रापुच्छपदागलि सुखानिस्वामिनादृष्टे लग्नभाग्याधिपेनवा जातस्यपुंसः प्राबल्यं
निर्दिशेदुत्तरोत्तरमिति कोपिग्रहोयदि द्वादशं नपश्यतीति अथपदाद्द्वादशेफलमाह नी
चेग्रहद्वन्द्वयोगाद्व्ययाधिक्यं द्वादशेग्रहसत्वेग्रहांतरदृष्टौसत्यांभूपात्‌ इत्यर्थः शुभग्रहेसद्व्य
यः पापेऽसद्व्ययः रविराहुभृक्कैर्नृपात्‌ पदाद्द्वादशेरविराहुभृक्कै स्थितैः समस्तैर्वाराज्यमूलो
व्ययः स्यात्‌ चंद्रदृष्टौव्यत्ययेन द्वादशेरव्यादौ चंद्रदृष्टिश्चेन्निश्चयाद्राजमूलोव्ययः चंद्रदृ
ष्ट्यभावेतुसंदिग्धइति बुधेनज्ञातिभ्योविवादाद्वा बुधेद्वादशगे ज्ञातिनिमित्तात्कलहाद्वा
द्रव्यव्ययः गुरुणाकरमूलात्‌ गुरुद्वादशेचेत्करव्याजेनव्ययः कुजशनिभ्यांभ्रात्‌मुखा
त्‌ द्वादशेकुजशनीचेद्भ्रात्रादिद्वाराव्ययः अथैकादशेलाभंव्ययवदितिदिशति एतैर्व्यय
एवंलाभः एतेद्वादशस्थानपतितैर्ग्रहैर्यथाव्ययउक्तः तथातैरेवएकादशगैस्तैनैवप्रका
रेणलाभोविभवतीत्यर्थः अथपदात्सप्तमेफलमाह लाभेराहुकेतुभ्यामुदररोगः पदात्स
प्तमेराहुकेत्वोरन्यतरेणउदररोगः स्यात्‌ अथपदात्द्वितीयस्यकेतोःफलमाह तत्रकेतु
नाझटतिज्यानिलिंगानि तत्रपदाद्द्वितीयेकेतुयोगेनशीघ्रमेववार्द्धक्यचिन्हानिभवंति
यत्तुस्वाम्यादिभिःलाभपदानुदृष्टसातत्रद्वत्यासप्तमेइत्युक्तं तन्न एवंचेत्तर्हि केतुनाझ

त्रा

।

६ 16

=दृष्ट्यायोगेनच =

द्दितिज्यानितिलिंगानीतिस्तवंप्रणीतंस्यात् तत्रेतिकिमर्थमिति अन्यच्च चंद्रगुरुशुक्रेषु
श्रीमंत इतिवक्तव्यत्वात्सप्तमस्यधनविचारेप्रयत्नाभावोर्थमिति अन्यच्च चंद्रगुरुशुक्रे तत्रेतिपदं =२
षुश्रीमंत इति वक्तव्यत्वाभावादिति तद्गुरुकेंद्रे आरूढात्षष्ठभे पापेचोरः स्यात्शुभ
वर्जितेषष्ठभेद्वितीये आरूढाद्वापितोमैतु सर्वदिग्व्याधिपोभवेत् सर्वज्ञस्तत्रजीवे =चभे =८
स्यात्कविर्वादीच भार्गवे वापि द्वितीयेइत्यर्थः चंद्रगुरुशुक्रेषु श्रीमंतः पदाद्द्वितीये व्य
स्तत्वयासमस्ततयावा चंद्रादिषुसत्सुश्रीमत इत्यर्थः स्वांशवदन्यत्प्रायेण अन्यद्
नानुरूपफलंकारकांशवद्बोध्यं प्रायेणत्युक्त्यानसर्वत्रकारकांशवत्फलं श्रोपदीनिक
णस्वस्यविरुद्धस्यातिदेशिकशास्त्रस्याप्रवृत्तेरितिभावः लाभपदेकेंद्रत्रिकोणेवाश्री
मंतः लग्नारूढात्केंद्रत्रिकोणेवा लाभपदे लग्नात्सप्तममारूढेसति लक्ष्मीवंतोभवंति
अन्यथादुःस्थे लग्नारूढात्सप्तमारूढेदुःस्थे षष्ठाष्टमव्ययस्थे सत्यन्यथासुःश्रीमंतो
नेत्यर्थः केंद्रत्रिकोणोपचयेषुद्वयोर्मैत्री लग्नपदात्सप्तमपदे केंद्रत्रिकोणोपचयगेसति
द्वयोर्भार्याभर्त्रोर्मैत्रीभवति एवंलग्नपदात्पुत्रादिभावपदे केंद्रत्रिकोणोपचयगेसति तयो

॥११॥२=२

एवंचकारकांश फलंपदाद्द्वितीये पिविचार्यमिति भावः =६

स्वांशवदितिसूत्र स्य =५

सप्तमपदे =४

कारकांशस्यपं चमृषिकेइत्यादि =६

६

सप्तमपदेदुःस्थे लग्नाद्वालग्नप दाद्वाषष्ठाष्टव्य यस्थे =२

लग्नस्य पदात् पितृमातृभ्रातृपुत्रपत्नीभावपदे ६।८।१२ सति ॥ उपलक्षणमेतत् =२

पितापुत्रयोः =१

त्तयोर्मैत्री ज्ञेया अत्रोपुच्चयपदं षष्ठातिरिक्तपदं रिपुयोगचिंतासु वैरमिति वक्तव्यत्वात् रि
पुयोगचिंतासु वैरं लग्नपदात्तत्तद्भावपदे षष्ठाष्टमद्वादशव्ययगे सति तयोस्तयोर्वैरं भवति लाभ
पद इत्यादि सूत्रचतुष्टयं वृद्धैः संगृहीतं लग्नारूढं दारपदं मिथः केंद्रगतं यदि भार्याभर्त्रोर्हि यो
मैत्री" त्रिकोणे तु साम्यं "द्वेष्योन्यथा भवेत्" एवं दारादिभावानामपि पुत्रादिमित्रता जातकद्व
यमालोक्य चिंतनीयं विचक्षणैरिति पत्नीलाभयोर्दृष्ट्या निराभासार्गलया पत्नीलाभयोर्लग्न
पदतः सप्तमयोर्निराभासार्गलया निष्प्रतिबंधार्गलया भाग्यं भवति दिष्टेत्याकारांतः शब्दः
दिष्ट्या समुपजोषं चेत्यानंदे स्यादमरः अथवा दिष्टमेव दिष्ट्यं भाग्यादयं येषां ते दिष्ट्याः भाग्यवंत
इत्यर्थः अत्र प्राचीनैरुक्तं यस्य पापः शुभो वापि ग्रहास्तिष्ठेच्छुभार्गले तेनेक्षितं लग्नप्राव
ल्यायोपकल्पते यदि पश्येद्ग्रहस्तत्र विपरीतार्गलस्थितः पत्नीलाभयोरिति भाग्ये सिद्धे पद
रूपलग्नगतदृष्ट्या तस्यैव भाग्यप्राबल्यरूपो गुणोनेन विज्ञापित इति विशेषः शुभार्गले ध
नसमृद्धिः पदसप्तमयोः शुभैरेव यद्यर्गलं तर्हि धनं बहु वर्धते एतेन पापार्गले धनं भव
ति शुभार्गले ततोपि विशेष इत्यर्थः सर्वसूत्रे शुभपापसाधारण्येन [illegible] विपरीतार्गलं विनि

त्रिलाभे वा त्रिकोणे वा तदा राजा न्यथाधमः ॥ आरूढौ पुत्रपित्रोस्तु त्रिलाभे केंद्रकोणयोः =४

भार्याभर्त्रोः =२

शुक्रषष्ठस्त्रिया श्च =४

निःप्रतिबंधार्गले =५

ग्रहेल =५

स्त्रेल =४

चतुर्थद्वितीयैकादशादिषु शुभार्गलस्थाने शुभस्थितो ग्रहः लग्नं पश्यति चेद्विपरीतार्गलस्थो ग्रहः लग्नं यदि न पश्यति तर्हि फलमिरं भवतीति ज्ञातव्यं =५

तृतीयषष्ठादशमादि विपरीतार्गलस्थः =१

र्गुल्काऽर्गलस्य धनादिमत्वे लक्षणभाग्यभोगः फलमित्युक्तं अस्मिन्सूत्रे तु शुभमात्र घटिते धनस
मृद्धिः सार्वदायिकी पापमात्र घटिते धनवत्त्वमात्रं पापशुभोभयघटिते कदाचिद्धनसमृद्धिः
७ कदाचिद्धनं नैवेति ननूभयतुल्यत्वेति ... शुभपापसाधारणविपरीतार्गलभिन्नशुभार्ग
१७ लमेवात्र शुभार्गलत्वेन कुतो न गृह्यत इति चेत् उच्यते सूत्रद्वये एकरूपाचेदर्गला तर्हि सर्वे
लोकाः सिद्धशुभार्गल इति सूत्रस्य वैयर्थ्यापत्तेरिति भावः न च भाग्यवत्त्वधनवत्त्वभेदादिति वाच्यं
धनं विना भाग्यवत्ताप्रतीतेरित्यलं जन्मकालघटिकास्वेकदृष्ट्यासु राजानः जन्मलग्नं प्रसि
द्धं काललग्नं होरालग्नं घटिका घटिकालग्नं एतेषु त्रिष्वपि केनचिदेकेन ग्रहेण दृष्टेषु राजा
लग्नमारभ्य इष्ट घटीपर्यंतं गल... नो भवंति अत्रैकग्रहदृष्टिविषयत्वमपेक्षितं न त्वेकग्रहमात्रदृष्टत्वं काले लग्नानयनं प्रागुक्तं होरा = ६
येत् इष्टघटी द्वाद... घटिकालग्नानयनं तु वृद्धैरुक्तं लग्नादेकघटीमात्रं याति लग्नं दिने दिने परंतु घटिकाल
शाधिके ... त्वं = ५ ग्नं निर्दिशेत्कालवित्तमः इति स्पष्टार्थः पञ्जी लाभयोश्च राश्यंशकदृग्गालेर्वा जन्मराशिकुं ७
द्रेष्काण = ३ डली नवांशकुंडली दृग्गाणकुंडलीषु लग्नसप्तमयोर्द्वयोरपि एकग्रहदृष्टयोः सतोः राजा
नो भवंति द्रेष्काणनयनं राशित्रिभाग इति पूर्वमुक्तं तथा च कुंडलीनयभेदेन लग्नसप्तमद्वय
गणनया षट्संपद्यते षट्स्वपि एकग्रहदृष्टो राजयोगः स्यादित्यर्थः राशिर्जन्मकाले चंद्राक्रा ... तथा च ... शतं ... वाऽवशिष्टघटी
घटिकालग्नानयनं तु सूर्योदयमारभ्य जन्मकालपर्यंतं यावत्यो घटिका जातास्तावंतो राशयः एकैकघटिका एकैकं लग्नं तथा च ... तथा च ज
संख्या जन्मलग्नराशितो गणनीया तत्रांतिमो राशिर्घटिकालग्नं प्रतिगीयते एवं च जन्मकुंडलीवत् होराकुंडली घटिकाकुंडली च विरचनीये तथा च ज
न्मलग्न होरालग्न घटिकालग्नेषु त्रिष्वपि केनचिदेकेन ग्रहेण ... = ३

द्रेष्काणेषु=२

तराशिर्नतुलग्नमिति तेष्वेकस्मिन्न्यूनेन्यूनं राजयोगद्वयेपिकिंचिद्धैकल्पपरमिदंसूत्रं ताश्च
तानिचतानि तेषुराश्यंशद्रेष्काणेषु जन्मकालघटिकासुच एकस्मिन्नेकग्रहदृष्टोन्यूनत्वेस
तिद्वयोर्लग्नयोरेकदृष्टयोः सतोर्न्यूनत्वंराजत्वमित्यर्थः एतदुक्तंभवेत् विलग्नघटिकालग्नहोरा
लग्नानिपश्यति उच्चग्रहेराजयोगेलग्नद्वयमथापिवा राशेर्द्रेष्काणतोंशाच्चराशेरंशादथापिवा
यद्वाराशिद्रेष्काणाभ्यांलग्नद्रष्टातुयोग्रहः प्रायेणायंजातकेषुप्रभूणामेवपश्यतइति वाक्यांतरं
च जन्मकालंघटि[illegible]लग्नेष्वेकेमेवेक्षितेषुतु उच्चारूढेतुसंप्राप्तेचंद्रक्रांतेविशेषतः क्रांतेवा
गुरुशुक्राभ्यांकेनाप्युच्चग्रहेणवा दृष्टार्गलग्रहाभावेराजयोगोनसंशयइति ग्रंथांतरोक्ता
नि अन्यत्रैषुलिखितं जन्मेतिसूत्रोक्तंराजयोगमंशद्रेष्काणयोरितिदिशति एवमंशतोद्रेष्का
णतश्च यथाजन्मेतिसूत्रेजन्मलग्नकुंडल्यासहहोरा[illegible]घटिकाकुंडल्योःसमुच्चयस्तथैवांशकुं
डल्याद्रेष्काणकुंडल्याचपृथक्पृथकेकालघटिकुंडल्योसमुच्चयेतथाच्चलग्नकालघटिकासु
अंशकालघटिकासुद्रेष्काणकालघटिकासुचैकदृष्टासुराजानइतिराजयोगत्रयंसिध्यति
राजयोगांतरंग्रंथांतरात्संगृहीतं निशार्द्धेचदिनार्द्धेचपरंसार्द्धद्विनाडिका शुभातत्रभवो
राजाधनीवातत्समोपिवेति अथयानयोगमाह शुक्रचंद्रयोर्मिथोदृष्टयोः सिंहस्ययोर्वाया

यथा जन्मराशितः द्वितीयचतुर्थपंचमभावेषु शुभास्तथैव कारककारकादपि चेत्स्युरित्यर्थः =६

नवंतः शुक्रचंद्रौ यत्र कचिद्द्विधमानौ यदि परस्परं दृष्टिभाजौ तर्हि यानवंतो भवंति एवं शु
क्रचंद्रावेव यदि सिंहस्थौ तृतीयगौ शुक्राच्चंद्रे तृतीयगे चंद्राच्च शुक्रे वा तृतीयगे सत्यपि यानवंत
१८ इति गोलार्थः तदुक्तं वृद्धैः चंद्रः कविं कविश्चंद्रं पश्यत्यपि तृतीयगे शुक्राच्चंद्रे ततः शुक्रे तृतीये
18 वाहनाधिपान् शुक्रकुजकेतुषु वैतानिकाः शुक्रादिषु मिथो दृष्टिमत्सु परस्परं तृतीयस्थेषु वा
वितानादिराजचिह्नवंतो भवंति स्वभाग्यदारमातृभावसमेषु राजानः आत्मकारकाद्राश्यादि
ना द्वितीयचतुर्थपंचमभावतुल्येषु शुभग्रहेषु राजानो भवंति एवं च तत्तत्कारकवशात्तेषां तेषा
मपि फलमूह्यं तस्मात्पुत्रादिकारकेष्वपि राजयोगवत्त्वे पुत्रादीनामपि राजत्वं वाच्यं कर्मदासयोः
पापयोश्च आत्मकारकात्तृतीयषष्ठभावसमयोः पापयोश्च राजानो भवंति कारकेति रूढं यो
गरूढ्यं लग्नसप्तमाधिपयोरिति दिशति पितृलाभाधिपाच्चैवं लग्नाधिपात्सप्तमाधिपाच्चैवं द्वि १८
तीयचतुर्थपंचमभावसमेषु शुभेषु तृतीयषष्ठभावसमयोः पापयोश्च राजान इत्यर्थः न चा
रूढाधिकारात् पितृपदे वारूढं ग्राह्यमिति वाच्यं जन्मेति सूत्रे स्वरूपकारेण क्वचित्कारकात्
क्वचिज्जन्मलग्नादुक्तत्वात् पितृशब्देनास्मिन् ग्रंथभाष्ये लग्नस्यैव ग्रहणाच्चेति यदि तत्पा
पः शुभस्थाने शुभः पापस्थाने शुभः तत्र फलमाह मिश्रे समाः योगरूढे शुभपापा मिश्रा
~~राजानो भवंति कारकेति रूढं योगरूढं लग्नसप्तमाधिपयोरिति दिशति पितृलाभाधिपाच्चैवं लग्नाधिपात्सप्तम~~
~~धिपाच्चैवं द्वितीयचतुर्थपंचमभावसमेषु शुभेषु तृतीयषष्ठभावसमयोः पापयोश्च =४~~

यथा राश्यादितः तृतीयचतुर्थभावयोः शुभग्रहास्तथैव कारकादपि चेत्स्युरित्यर्थः =४
पितृलाभाधिपाच्चैवमिति सूत्रे =३

लास्समाः राजसमा इत्यर्थः दरिद्राविपरीते शुभस्थाने पापएव पापस्थाने शुभाएव तर्हि दरिद्रा
भवंति मातरि गुरौ शुक्रे चंद्रे वा राजकीयाः लग्नाधिपात्सप्तमाच्च पंचमे गुरौ वा धन्यतमे सति राज
कीया राजाधिकारवंतो भवंति कर्मणि दासे वा दापे सेनान्यः लग्नसप्तमाधिपाभ्यां तृतीये ष
ष्ठे वा पापे सति सेनाधिपतयो भवंति अथ बुद्धियोगमाह स्वपितृभ्यां कर्मदासस्य दृष्ट्या तदीश
दृष्ट्या मातृ नाथ दृष्ट्या च धीमंतः आत्मकारकाल्लग्नाच्च तृतीयषष्ठगतग्रहदृष्ट्या कारके ल
ग्ने चेत्यर्थः तथा च तृतीयषष्ठेश दृष्ट्या पंचमेश दृष्ट्या लग्नकारकयो धीमंतो भवंति दारेश
दृष्ट्या सुखिनः कारकाल्लग्नाद्वा चतुर्थेश दृष्ट्या लग्नकारकयोः सुखिनो भवंति रिपुनाथ दृ
ष्ट्या व्ययशीलाः कारकलग्नाभ्यां द्वादशेशस्य लग्नकारकयोर्दृष्ट्या व्ययस्वभावा भवंति स्वामिदृ
ष्ट्या प्रबलाः लग्ने लग्नेश दृष्ट्या कारके कारकाश्रयराशीश दृष्ट्या बलवंतो भवंति अथापयोगा
नाह पश्चाद्रिपुभाग्ययोर्ग्रहसाम्ये बंधः कोणयो रिपुजातयोः कीटयुग्मयोर्दारिष्फयोश्च
चतुर्थदशमयोर्वा ग्रहसाम्ये एकश्चेदेकः द्वौ चेद्द्वौ त्रयश्चेत्त्रयः इति रीत्या खेटसाम्ये सति बं
धः कारागृहपतनं भवति अत्र पठितेषु द्विकेषु न सम्बन्धयानियम इति बोध्यं एवं कोणात
दीशानां च शुभसंबंधे निरोधमात्रं पापसंबंधाच्छृंखलाप्रहार[illegible]दयः कोणानां द्विद्वादशादि द्वि

७।२०।११।३।२।५।८।०।२२

कानां पूर्वोक्तरीत्या शुभसंबंधे सति द्वितीयद्वादशयोरित्यादि द्विकयोरन्यतरत्रयोग घटकतया
शुभसंबंधश्चेन्निरोधमात्रं न तु पीडा पापसंबंधात्केवलपापसंबंधाच्चश्रृंखलादयो भवंति द्विद्वाद
शादिषु शुभसंबंधाभावेपि द्विद्वादशेष्वादिषु शुभसंबंधे सति निरोधमात्रं पापसंबंधे सति शृंख
लादयो भवंति अथ नेत्रभंगयोगमाह शुक्रात्कोणपरस्थो राहुः सूर्यदृष्टो नेत्रहा शुक्राल्लग्नाद्वा आरू
ढपदस्य पंचमराशिस्थारूढस्यो राहुः सूर्यदृष्टश्चेन्नेत्रनाशकरः स्यात स्वदारगयोः शुक्रचंद्रयो
रातोद्यराजचिह्नानि च स्वादारात्मकारकाच्चतुर्थगयोः शुक्रचंद्रयोः सतोः आतोद्यं वाद्यविशेषो वा
राजचिह्नानि पताकादीन्यिच स्युः ॥ ॥इति जैमिनिसूत्रव्याख्यायां सुबोधिन्यां प्रथमाध्या
यस्य तृतीयः पादः॥ ॥अथोपपदादिकमवलंब्य फलमादिशति तत्रादा
वुपपदं लक्षयति उपपदं पदं पित्रनुचरात लग्नानुचरात पदं लग्नाद्द्वादशस्य राशेर्यत्पदं त
दुपपदमित्यर्थः ननु पित्रनुचरपदेन द्वादशस्य बोधः कथमिति चेत उच्यते पितृलग्नमनुच
रं द्वितीयं यस्येति व्युत्पत्त्या ग्रहणात यत्तु पित्रानुचरादिति पाठं स्वीकृत्य खंडनात सप्तसंख्यालाभात्तेस समस्तात्प
प्रमात्पदमुपपदमिति ग्रंथेकृत्कं तदयुक्तं एवं चेद्बाधवात उपेपदं पदं लाभादिति सूत्रं पठनीयं स्या १य२ नं० वद
दित्यलं तत्र फलमाह तत्र पापस्य पापयोगे प्रव्रज्या दारनाशो वा पापस्य तत्र स्वामिके तस्मिन्नु २२=३
पापस्य तत्र स्वामिके पापसंबंधिनि पापस्वामिके तस्मिन्नुपपदद्वितीये पापग्रहयोगे सति=१
तं२

लग्नानुचरात्प
दं द्वादशराशेर्य
त्पदं तत् उपपद
मित्यर्थः=५
द्वादशं=२
२ ६ ० ११=३

१९

तत्सुखाभावः = १

पपदद्वितीये पापयोगे सति प्रव्रज्या संन्यासः स्त्रीनाशो वा स्यात् यथाकारकाधिकारपदाधि
कारयोस्तत्त्वेति पदे नकारकेपदे इत्यर्थो भवति तथात्रोपपदे इति कुतो नोक्तमिति चेत्सत्यं त
त्रोभयत्राधिकारस्थितः अत्र नास्तीति तत्र पदे नहि संख्यालाभादुपपदद्वितीये इत्युक्तं अनु
भवसिद्धत्वाच्चेति तदुक्तं वृद्धैः आरूढात्सप्तमे पापे चोरः स्याच्छुभवर्जिते आरूढाद्दारा

अत्रारूढपदे नउ
पपदं गृह्यते = ४

स्तो मूर्त्तिपु सर्वद्विपपाधिपो भवेत् सर्वज्ञस्तत्र जीवे स्यात्कविर्वादी च भार्गवे इति आरूढादुपपदा
त् आरूढपदेन चेदारूढं गृह्यते तर्हि पदाधिकार एवोक्तं स्यान्न त्वत्रेति नचोपपदादिति वक्तव्ये
आरूढादिति कथमुक्तमिति वाच्यं उपपदस्याप्यारूढत्वादेव नात्र रविः पापः अत्र विषये र
विः पापत्वेन न ग्राह्यः तेन सिंहे उपपदद्वितीये मेषादि पापराशौ रवौ वा सति नेदं फलमित्यर्थः

उपपदद्वितीये वा
शुभयोगे सति = ५

शुभदृग्योगान्न उपपदद्वितीये शुभदृष्टियोगाभ्यामुक्तयोगेस्सत्यपि नेदं फलं भवति नीचे दारना
शः उपपदद्वितीये उच्चांशे उच्चग्रहाधिष्ठिते वा सति बहुदारः स्यात् युग्मेच उपपदद्वितीये मि
थुने सति बहुदारः स्यात् दारनाशयोगे विलंबकरयोगमाह तत्र स्वामियुक्ते स्वर्क्षे वा तदुत्ताबु
त्तरायुषि निर्दारः तत्र उपपदद्वितीये स्वामिना युक्ते उत्तरायुषि निर्दारः स्यात् तच्छब्देनपूर्व
परामर्शः तदुत्तो तस्य उपपदद्वितीयस्य हेतुः स्वामी तस्मिन् स्वर्क्षे स्वराशौ सति वा उत्तरायुषि

"उपपदद्वितीये
वा इति पि संबं
धः इति केचिद्व
दंति =

उपपदे द्वितीये
वा मिथुने सति
मेषादितो युग्मे
वा सत्यपि = ८

^नीचग्रहें शके नीचग्रहाधिष्ठिते वा सति दारनाशो भवति उच्चे बहुदारः उपपदद्वितीये ४

उपपदाद्वितस्मिन्स्वामिनि दारकारके वा शुभवर्गशुभग्रहसंबंधे सति = ६

निर्दारः स्यात् राशेः कारणीभूतो ग्रह एव तस्मात्स्वामिनः स्वगृहयोगो ऽपेक्षितः ननु स्वा
म्यादिभिस्तच्छब्देन दारकारकग्रहणं न्वयेनेदं कथमुक्तमिति चेच्छृणु आदौ दारकारकग्र
२० हणाभावाच्च ननु रविचंद्रयोरेकगृहत्वात्स्वर्क्षेतरहेतावितरांशस्य संभवो नेति चेन्मास्त्वस्मा
कं कान्ततिरिति उच्चे तस्मिन्नुत्तमकुलाद्दारलाभः तस्मिन्नुपपदद्वितीयस्वामिनि उच्चरा
शौ स्थिते सति उत्तमकुलाद्दारलाभः स्यात् नीचे विपर्ययः तस्मिन्नुपपदद्वितीयस्वामिनि
नीचराशिस्थिते अनुत्तमकुलाद्दारलाभः स्यात् शुभसंबंधात्सुंदरी उपपदद्वितीये शुभवर्ग
दृष्टियोगे सति स्त्री सुंदरी भवति राहुशनिभ्यां अपवादात्त्यागो नाशो वा रक्षे उपपदद्वितीये रा
हुशनिभ्यां योगे सति लोकापवादस्त्रियस्त्यागो नाशो वा स्यात् शुक्रकेतुभ्यां रक्तप्रदरः उपपदद्विती
ये शुक्रकेतुयोगे सति रक्तप्रदररोगवती स्त्री स्यात् अस्थिस्रावो बुधकेतुभ्यां उपपदद्वितीये २०
बुधकेतुभ्यां योगे अस्थिस्रावरोगवती स्त्री स्यात् शनिराहुभिरस्थिज्वरः उपपदद्वितीये
शन्यादित्रिकयोगे अस्थिज्वरवती स्यात् बुधकेतुभ्यां स्थौल्यं उपपदद्वितीये बुधकेतुभ्यां यो
गे स्थूला स्त्री स्यात् बुधक्षेत्रे मंदराहुभ्यां नासिकारोगः कुजक्षेत्रे च बुधगृहे भौमगृहे च उपप
दद्वितीयगते सति शनिभौमाभ्यां योगे नासिकारोगवती स्यात् गुरुशनिभ्यां कर्णरोगः न

रहकाच बुधकुजान्यतरक्षेत्रे उपपदद्वितीयगेसति तत्रगुरुकयानियोगेकर्णरोगवती नरहकाना
डिकानिः सरणारोगवतीचस्यात गुरुराहुभ्यांदंतरोगः बुधकुजान्यतरक्षेत्रगेउपपदाद्वितीयेगुरुराहु
भ्यांयोगेदंतरोगवतीस्यात शनिराहुभ्यांकन्यातुलयोःपंगुर्वातिरोगोवा कन्यातुलान्यतरगेउपपद
द्वितीयेशनिराहुभ्यांयोगेपंगुर्वीवातरोगवतीस्यात शुभदृग्योगान्न उपपदाद्वितीयेशुभयोगोदृष्टि
र्वीस्यात्तर्हिनिरुक्तादोषानस्युः सप्तमांशग्रहेभ्यश्चैवं उपपदालयःसप्तमोभावस्तत्रावस्थनवां
शाध्वताभ्यां तयोःस्वामिनोग्रहौताभ्यांचद्वितीये एवंश्चैवोक्तानिसमुन्नेयानि तदुक्तंवृद्धैः सप्त
मस्याद्वितीयस्थेप्येवंफलमुदाहृतामिति बुधशनिशुक्रेष्वनपत्यः उपपदात्सप्तमांशग्रहेभ्यःपंच
मेषुबुधशनिशुक्रयोगेसत्यपत्यहीनोभवति पुत्रेषुरविराहुगुरुभिर्बहुपुत्रः उपपदात्सप्तमां
शग्रहेभ्यः पदोपरलग्नगुरुपुत्रकारकेभ्यः पंचमस्थानेषुरव्यादिषुसत्सुबहुपुत्रः स्यात चंद्रेले
कपुत्रः सप्तमांशग्रहेभ्यःपंचमस्थानेषुचंद्रेसति एकपुत्रः मिश्रेविलंबात्पुत्रः ग्रहमिश्रत्वे
सतिविलंबात्पुत्रलाभः कुजशनिभ्यांदत्तपुत्रः उपपदात्सप्तमांशग्रहेभ्यः पंचमेषुकुजशनिभ्यां
स्थिताभ्यांदत्तपुत्रवानस्यात ओजेबहुपुत्रः उपपदात्सप्तमांशग्रहेभ्यः पंचमेषुओजराशौसति
बहुपुत्रः स्यात युग्मेऽल्पप्रजः ओजस्थानेषुयुग्मराशौसत्यल्पापत्योभवति ग्रहकेमान्कु

मिथुनेयुग्मराशौवा

उक्तस्थानेषु चंद्रेसति एक पुत्रोभवति

×पदे०१२ तस्माद्यत्र्ययस्य संभवस्तस्याग्रिमसूत्रेऽनुवृत्तिः कार्या=३

त्रित दीशापंचमांशग्रहेभ्यश्चैवं ग्रहकेमाज्जन्मलग्नकमाद्यद्याभावानां विचारः क्रियते तथा
कुत्रितदीशादिभ्योविकुर्यात कुत्रितदीशावुपपदेशो ताभ्यां पंचमांशग्रहाः पंचमभावात्तद्भावस्थन
२९ वांशश्च ताभ्यां तयोः स्वामिग्रहाभ्यां चैवं सर्वेक्तिफलविचारः कार्य इत्यर्थः कुत्रिपदेन प्रकरणपठितो
पपदस्य ग्रहणं ननु स्वाम्यादिभिः कुत्रितदीशावितिसिंहरवीत्युक्तं तत्सर्वसाधारण्यादनुपयुक्तं
विशेषतोस्मिन्नशास्त्रेऽत्तरगम्यांशानामेव ग्रहणादिति भ्रातृभ्यां शनिराहुभ्यां भ्रातृनाशः उपपदे पदे०१४ स्या०५
शाभ्यां भ्रातृस्थानस्थाभ्यां मेकादशतृतीयस्थाभ्यां शनिराहुभ्यां भ्रातृनाशः एकादशेज्येष्ठस्य तृ
तीये कनिष्ठस्य नाशश्च कर्मादिभ्यातुर्यया दिज्येष्ठस्येति सूत्रदर्शनात ननूपपदेशाभ्यामिति कु
तः समागतमिति चेच्छृणु ग्रहकेमादितिसूत्रात्कुत्रितदीशपदात नचसमासपतितपदानामे
कांशानुवृत्तेरसंभवादिति वाच्यं अन्यपदेभ्योभ्रातृविचारयोग्यत्वादेकांशानुवृत्तेरितिभावः शु
क्रेण व्यवहितगर्भनाशः एकादशतृतीयान्यतरस्थेन शुक्रेण यथाकेमं व्यवहितसर्वपिरभ्रातृग २९
र्भनाशः ~~[illegible]~~स्यान्त पितृभावेशुक्रदृष्टेपि लग्ने लग्नादष्टमे वा शुक्रदृष्टे सत्यपि व्य तत्रवर्तमाने
वहितगर्भनाशइत्यर्थः कुजगुरुचंद्रबुधैर्बहुभ्रातरः उपपदेशाभ्यां तृतीयेकादशस्थैः कुजा पीत्यर्थः=३
दिभिः भ्रातृबाहुल्यं स्यात शन्याराभ्यां दृष्टे यथास्वं भ्रातृनाशः उपपदेशाभ्यां तृतीयेकादशयोः

उपपदं च ईशश्च ताभ्यां=२

भ्रातृस्थानस्था भ्यामेकादश तृतीयस्थाभ्यां शनिराहुभ्यां=६

एकादशेशुक्रे सर्वस्मितृतीये शुक्रे कनिष्ठ स्य व्यवहित गर्भनाशइत्य र्थः=४

भ्रातृस्थाने एकादशे तृतीये वा शनिनादृष्टे सति भ्राता केवलमवशिष्यते ऽन्येन श्यंतीत्यर्थः = २

शन्यारदृष्टौ सत्यां यथा स्वंभ्रातृस्थानमनतिक्रम्य तृतीये दृष्टौ कनिष्ठस्य एकादशे दृष्टौ ज्येष्ठस्य उभयत्र दृष्टावुभयोश्च नाशः स्यात् शनिनास्वमातृशेषश्च उपपदेशाभ्यां तृतीये कादशयोः शनिदृष्टौ सत्यां केवलं स्वमात्रशेषः स्यात् अन्येन श्यंतीत्यर्थः केतौ भगिनीबाहुल्यं उपपदेशाभ्यां तृतीये कादशयोः केतौ सति भगिन्यो यथा स्वं भूयस्यो भवंति लाभेशाद्राग्यमे राहौ दंष्ट्रावान उपपदसप्तमेशाद्द्वितीय राशौ राहौ सति स्थूलदंष्ट्रावान् स्यात् तदुक्तं प्राच्येः सप्तमेशाद्द्वितीयस्थे राहौ म्लेकः खलस्थिते अदंतो धिकदंतो वा दृष्ट्यायुक्तौ ऽधवो भवेत् पवनव्याधिमान्केतो यद्वा स्याद्स्फुटोक्तिमान् तत्र नानाग्रहे योगे मिश्रं फलमुदाहृतमिति केतौ स्तब्धवाक् उपपदसप्तमेशाद्द्वितीये केतौ सति स्तब्धवाग स्फुटोक्तिमान् स्यात् मंदे कुरूपः उपपद सप्तमेशाद्द्वितीये शनौ सति कुरूपो भवति स्वांशवशाद्गौरनीलपीतादिवर्णाः आत्मकारकाश्रितनवांशस्वाभाव्याज्जातकांतर प्रसिद्धजातकवतो वर्णा ग्राह्याः एवं चैतत्त्कारकांशतत्त्वेषां तेषां वर्णा ज्ञेयाः स्यपि वो ध्यं अमात्यानुचराद्देवताभक्तिः अमात्यग्रहान्यूनो यो ग्रहस्तस्माद्देवताभक्तिर्विचारणीया अमात्यानुचरो देवताकारकस्तस्य देवतापापत्वे सति क्रूरदेवतायां भक्तिः शुभत्वे सौम्यदेवतायां उच्चगत्वे स्वर्गगतत्वे च भक्ति दृढता नीचगतत्वे भक्त्यस्थैर्यमित्यादिकं ज्ञेयं स्वांशकेवलपापसंबंधे परजातः कारकांशे शुभग्रहरहिते केवलपापसंबंधे जारजातो भवति संबंधस्तु

रक्तः श्वेतः शुकनिभतनुः पाटलो धूम्रपांडुश्चित्रः कृष्णः कनकसदृशः पिंगलः कर्बुरश्च वभ्रुः स्वच्छः = ८

इत्यादि फलानि आत्मकारकाश्रितनवांशवशात्स्वामिवशाद्दृष्टिवशाच्च ज्ञेयानि = ८

रक्तः श्यामो भूपश्च गौरः ... नीलुखो गौरलगो रक्तवर्णः दूर्वाश्यामो ... गौरिगात्रः श्यामः ... कृष्णः ... सितः ... पीतः ...

विप्रादितः शुक्रगुरू कुजार्कौ शशी बुधश्चेत्यसितो ऽन्त्यराणां ॥ मधुपिंगलदृक्चतुरस्रतनुः पित्तप्रकृतिः सविता ऽल्पकचः । तनुवृत्ततनुर्बहुवातकफः प्राज्ञः शशी मृदुवाक्शुभदृक् । क्रूरदृक्तरुणमूर्तिरुदारः पैत्तिकः सुचपलः कृशमध्यः = ८

दृष्टियोगषड्वर्गो ज्ञेयः नात्रपापात् अत्र कारकश्चेत्पापो भवति तदा इदं फलं न स्यात् का
रकातिरिक्तादेव पापसंबंधादिदं फलं वाच्यं न कारकात्पापादित्यर्थः अथवा अत्राष्टमे पा
२२ पग्रहे सति नायं योगः शनिराहुभ्यां प्रसिद्धाविति शनिराहू यदि योगघटको शनिराहुदृष्टि
योगे षड्वर्गे परजातत्वप्रसिद्धिर्भवति गोपनमन्योन्यः अन्येभ्यो पापग्रहेभ्यो योगे सति परजात
त्वगोपनं भवति शुभवर्गेऽपवादमात्रं पापग्रहेषु योगघटकेषु सत्सु कारकांशे शुभषड्वर्ग स्वांशवदन्यत
संबंधे सति तु परजातत्वापवाद एव भवेन्न तु परजातत्वमित्यर्थः द्विग्रहे कुलमुख्यः कारकां इति अतिदेश
शे द्विग्रहयोगे सति कुलमुख्यो भवति ॥ ॥ इति श्रीनीलकंठज्योतिर्विरचितायां जैमिनिसू नपदद्वितीय
त्रव्याख्यायां सुबोधिन्यां प्रथमाध्यायस्य चतुर्थः पादः समाप्तः ॥ ॥ ॥ ॥ फलं बोध्यं = ६

२२